

संस्कृत–त्रैमासिकी
अङ्काः १ – ४

ISSN : 2278-3741
जनवरी २०१६–अक्टूबर २०२०
वर्षद्वयम् ४३–४४

# अजस्रा

अखिल-भारतीय-संस्कृत-परिषद्
लखनऊ

# नियमाः

१– अजस्रानाम्नीयं त्रैमासिकी संस्कृतपत्रिका मकर–मेष–कर्क– तुला–सङ्क्रान्तिषु (जनवरी–अप्रैल–जुलाई–अक्तूबरमासेषु) प्रकाशिता भवति।

२– अस्याः पत्रिकाया उद्देश्यं संस्कृतसम्पदां संरक्षणम्, विभिन्नपद्धतिजुषां रचनानां संवर्धनम्, प्रातिभनूतनकृतीनां संसर्जनञ्च।

३– समालोचनाभिलाषुकैः प्रकाशकैर्लेखकैर्वा नवीनकृतीनां द्वयी प्रेषणीया।

४– पत्रिकायामस्यां कवितालेखकथानाटकादीनि शोधनिबन्धाश्च स्थानं प्राप्स्यन्ति।

५– प्रकाशनाय प्रेषिताः सर्वविधा रचना एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरै–र्लिखिताः टङ्किता वा स्युः।

६– कृतीनां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादके संरक्षितोऽस्ति।

७– अस्वीकृता लेखाः टिकटसहितपत्रपुटके लब्धे सति लेखकेभ्यः प्रत्यावर्तिष्यन्ते।

८– लेखकेभ्यस्तल्लेखानां दशसङ्ख्याका उन्मुद्रितयः प्रदास्यन्ते।

संस्कृत-त्रैमासिकी

ISSN-2278-3741

# अजस्रा

अङ्काः १ – ४ जनवरी–२०१६–अक्टूबर २०२० वर्षद्वयम् ४३–४४

**अखिल–भारतीय–संस्कृत–परिषद्**

देववाणी–भवनम्, अलीगञ्जम्,

लखनऊ–२२६०२४

**शुल्कम्**

| | | | | |
|---|---|---|---|---|
| वार्षिकम् | २४०.०० | रूप्यकाणि | $ | २५.०० |
| एकस्याऽङ्कस्य | ६०.०० | रूप्यकाणि | $ | १०.०० |
| आजीवनम् | २१००.०० | रूप्यकाणि | $ | २१०.०० |


**प्राज्ञपरिषत्**

प्रो० राधावल्लभ–त्रिपाठी

प्रो० राजेन्द्र–मिश्रः

प्रो० आजादमिश्रः

प्रो० दीप्ति त्रिपाठी

प्रो० गङ्गाधरपण्डा

प्रो० रमेशकुमारपाण्डेयः

प्रो० राजारामशुक्लः

प्रो० शशितिवारी

प्रो० रामलखनपाण्डेयः

प्रो० रामसुमेरयादवः

**प्रधान–सम्पादकः**

**प्रो० अशोककुमारकालिया**

**सम्पादक :**

**प्रो० बृजेशकुमारशुक्लः 'पद्मश्रीः'**

**सह–सम्पादकः**

**डॉ० प्रयागनारायणमिश्रः**


---


अखिल भारतीय संस्कृत–परिषद्, देववाणी–भवनम्, अलीगञ्ज, लखनऊ की ओर से प्रो० बृजेशकुमारशुक्ल, मन्त्री, अखिल भारतीय संस्कृत परिषद् द्वारा प्रकाशित और प्रो० बृजेशकुमार शुक्ल 'पद्मश्री' द्वारा सम्पादित तथा श्री मनीष मेहता द्वारा प्नार आफसेट, 17 अशोक मार्ग, हजरतगञ्ज, लखनऊ से मुद्रित।

# अनुक्रमः


| | | | | |
|---|---|---|---|---|
| ● | सम्पादकीयम् | | | ४ |
| १. | वेदेषु संस्कृतिः | – | ज्योत्सना माडिसेटि्ट | ५ |
| २. | सूत्राधार–बउरीमहाराणाविरचितं शिल्पशास्त्रम् | – | डॉ० हेमुमहेशराठोड | १० |
| ३. | वैदिकसाहित्ये केचन आलङ्कारिकप्रयोगाः | – | डॉ० शङ्करनाथतिवारी | २६ |
| ४. | श्रीहरिकृष्णाऽवस्थिषष्टिः | – | प्रो० बृजेशकुमारशुक्लः | ३५ |
| ५. | पाञ्चरात्रश्रीवैहायसीसंहिता | – | डॉ० पि.टि.जि.वै. सम्पत्कुमाराचार्यः | ४३ |
| ६. | व्याकरणवाङ्मयेऽष्टाध्यायीकारा–चार्यपाणिनेरवदानम् | – | डॉ० मङ्गलारामः | ६० |
| ७. | वैदिकवाङ्मये वाक्–तत्त्वम् | – | रस्मितादासः | ७१ |
| ८. | वाल्मीकिरामायणे वर्णित–मिथकबिम्बः | – | डॉ० गीता अग्रवालः | ७६ |
| ६. | भारती–विद्या–वैभवम् | – | डॉ० प्रयागनारायणमिश्रः | ८१ |
| १०. | भारतीयसमाजे नारीणां महत्त्वम् | – | डॉ० रामेश्वरप्रसादगुप्तः | ८४ |
| ११. | छन्दः पादौ तु वेदस्य | – | डॉ० अंशुमान्–शुक्लः | ८८ |
| १२. | वेदेषु विष्णुः | – | डॉ० जयश्री–चट्टोपाध्यायः | ६३ |

# सम्पादकीयम्

अखिलभारतीयसंस्कृतपरिषदस्त्रैमासिकशोधपत्रिकाया अजस्राया वर्षद्वयस्य संयुक्ताङ्कमिमद्य विदुषां गवेषकाणाञ्च समक्षमुपस्थापयता नो हृदयानि नितरां प्रमोदन्ते। लखनऊनगरस्याऽलीगञ्जक्षेत्रस्य देववाणीभवने संस्थितेतेयमखिलभारतीयसंस्कृतपरिषद् साम्प्रतिके कोरौनासङ्कटेऽपि संस्कृतसमाराधनतत्परतयाऽजस्रायाः प्रकाशनक्रमे कृतसङ्कल्पा वरीवर्ति, अत एव विलम्बेनापीमां पत्रिकां प्राकाश्यमुपनीय भगवतः प्रसादेनाऽजस्राया अजस्रत्वं साधयितुं साफल्यमुपयाता। अजस्रायाः साम्प्रतिके संयुक्ताङ्के वेद–वेदाङ्ग–श्रीमद्रामायण–काव्य–काव्यशास्त्र–दर्शन–साहित्य–व्याकरणादि–विषयकानि द्वादशसङ्ख्यकानि प्रणयनानि प्रकाशितानि। अस्यां पत्रिकायां प्रकाशानार्थं विविधविद्यामर्मज्ञैः विद्वद्वरेण्यैः स्वकीयानि महार्ह पत्राणि सम्प्रेष्य महदनुग्रहः कृतः, अत एव तेभ्यस्सर्वेभ्य एव ससम्मानं साधुवादं विनिवेद्य सादरं प्रार्थ्यते यत् पत्रिकायां यास्त्रुटयः स्खलनजन्यं न्यूनत्वं च दृष्टिपथमुपयान्ति तदखिलं विपश्चिद्भिः सूचनापूर्वकं सुष्ठु संशोधनीयम्। सम्प्रति नाऽधिकमुक्त्वा समासेनेदमुच्यते यदखिलभारतीय–संस्कृतपरिषदः सारस्वतसाधनायाः प्रतिमानत्वेनाऽजस्रायाः संयुक्ताङ्कमिमथकप्रयासेन शोधचिकीर्षूणां संस्कृतानुरागिणां विद्वत्तल्लजानां पाणिपंकेरुहेभ्यः समर्प्य सम्पादकमण्डलम् महत्प्रमोदमनुभवति।

इतिशम्

***

**ज्योत्सना माडिसेटि्ट**
वारङ्गलम्

# वेदेषुसंस्कृतिः

अस्मिन् जगति समुपलब्धेषु विविध–भाषागत–प्राचीनग्रन्थेषु वेदा एव प्राचीनतमा ग्रन्थाः। अतो भारतीयानाम् आद्य–धर्मग्रन्था वेदा एव।

**वेद–शब्दार्थः–**

''विद्–ज्ञाने'' इति धातोः 'घञ्' प्रत्यये कृते 'वेद' इति शब्दः सिद्ध्यते। धातु–पाठे विद्–धातोः बहवोऽर्थाः प्रोक्ताः, यथा– 'विद्' सत्तायां, विद्लृ–लाभे, विद्–विचारणे, इत्येषां सर्वेषां धातूनां तेषामर्थानां सार्थक्यं वेदेषु समुपलभ्यते।

सायणाचार्यमतानुसारं–इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद इति, अर्थात् वेद इष्टं प्रापयति अनिष्टञ्च निवारयति।

''भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'' भारतस्य कीर्तेः द्वौ आधारौ स्तः, संस्कृतं, संस्कृतिश्च व वस्तुतः''संस्कृतिः संस्कृताश्रया''।

वर्तमानकाले भारतदेशे यावन्त्यभिप्रायाणि सन्ति अथवा मतानि सन्ति तेषां सर्वेषामपि मूलस्रोतांसि वेदा एव। ज्ञानस्य विमला धाराः समस्तभूमण्डले सर्वास्वापि दिशासु वेदेभ्य एव निसृता इति उक्तिः अतिशयोक्तिर् नास्ति।

अस्माकं पूर्वजाः केन प्रकारेण जीवनं यापयामासुः? काभिः, क्रीडाभिस्ते स्वीयं मनोमोदमायासुः का देवतास्तेपूजयामासुः–? केन च विधिना ते अग्नौ आहुतीः समर्पयामासुः इत्यादि विषये जिज्ञासा यदा हृदि विजृम्भते, तदा तद्विषयकं ज्ञानं वेदेभ्य एव प्राप्तुं शक्यते। अत एव अस्माभिः पुनः पुनः वेदाः एव अनुसरणीयाश्च।

**ज्ञानराशयो वेदाः–**

सर्वविध–ज्ञान–निधयः वेदा एव। मनुना अपि स्पष्टीकृतं यत् ''सर्वज्ञान मयो हि सः'' इति

भारतीयसंस्कृतिः वैदिक–संस्कृतिरेव। आत्मनः वा मनो वा भौतिक–

जीवनस्य वा समृद्धिः सर्वं वेदेषु संस्काररूपेण निक्षिप्तमस्ति। ऋषयो मानवजीवनस्य संस्करणार्थं शाश्वतान् सिद्धन्तान् प्रतिपादितवन्तः।

अद्यतन–समाजाय (एतादृश–संस्करणानि आवश्यकानि अद्यतन–समाजाय) मनसः, आत्मनः संस्करणम्, भौतिक–संस्करणमपि अत्यन्त–मावश्यकम्। किमर्थं नाम पाश्चात्यसंस्कृतेः विषधारया समाजं स्वकीयं नैतिक–सामजिक–कर्तव्यं विस्मृतम्। सर्वे अन्तर्जालम् (इन्टरनेट्), मुखग्रन्थं (फेसबुक्), किम् तत्, ह्वाट्सअप, आज्ञानालं (यूट्यूब्), चलनभाषिणी (सेलफोन्), निस्तन्त्रि–भाषान्तर्जालयन्त्र (वाई–फाई), इत्यादीनां प्रयोगेन, अन्धानुसारेण, स्व– जीवनप्रमाणानि, विस्मरन् परिवारिक–गुरुशिष्य–विषयकाः सर्वविध–सम्बन्धाः, व्यवहारज्ञानमपि आधुनिकसमाजेन विस्मृतं सर्वं खलु।

अतोऽस्माभिः कथं वर्तनीयं, किं करणीयं, किं ज्ञातव्यम्, एवं सर्वविध–व्यवहारज्ञानं ज्ञातुं वेदा एव शरण्यः, तान् वैदिकग्रन्थान् पुनरेकवारं उद्घाट्य आधुनिकयुवतीभिः युवकैश्चावश्यमध्ययनं करणीयं। ''उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत'' इति वेदान्तेन उद्घोषितमस्ति।

अतोऽत्र वेदेषु, स्थिताः संस्कृतेः काश्चन मुख्या विशेषाः प्रस्तूयन्ते

१) **उदात्तभावना–** भारतीयानामुदात्तं मनः, ऋग्वेदे भूतदयासु पश्यामः

**''शन्नो भविद्वपदे शं चतुष्पदे''**[१] इति जगति स्थितेभ्यः समस्त–प्राणिभ्यो द्विपादचतुष्पादसमस्त–जन्तुभ्यः शुभं भवतु, इति विचार–भावना जगति दृश्यते। वयं चिन्तयामो यद् वयमेव सुखेन जीवामः, मम जीवनं सम्यग्रूपेण भवति चेद् वरमिति, अद्यतनभारतीयाश्चिन्तयन्तः सन्ति। किन्तु वयं एव न अस्माभिः सह समस्त–प्राणिभ्यः द्विपद–चतुष्पद–प्राणिभ्यः शुभं भूयाद् इति भावनां वेदाः समुद्घाटयन्ति–

२) **समभावना–** वयमस्मदीयानेव समभावनया पश्यामः परेषान्प्रति विरोध–भावनया एव भवामः खलु। किन्तु वेदा विरोधभावमुत्सृज्य सद् भावनया सर्वे सर्वान् अपि समभावनया पश्यन्तु, सर्वे सर्वेषाम् परस्परं प्रियमिच्छन्तु

---

१. ऋग्वेदे ७/५७/१

इति घोषयन्ति–

**"प्रियं सर्वस्य पश्यत उत शूद्रे उत आर्ये"**[२]

एवं **यस्तु सर्वाणि भूतानि आत्मन्नेवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विचिकित्सति।।**[३]

**यस्मिन् सर्वाणि भूतानि आत्मैवानुभूयाद् विजानतः।**
**तत्र को मोहः को शोकः एकत्वमनुपश्यतः।।**[४]

**३) त्यागचिन्तनम्–** अस्माकं जीवने त्यागेन विना किमपि न लभते। किन्तु अद्यतन–समाजे जना एतद् वस्तु मम, अहं न ददामि इति भावनया एव सर्वे सर्वत्र व्यवहारः कुर्वन्ति। किन्तु जगति स्थितं समस्त–वस्तु–जातमीश्वरेण सृष्टमतो जगति यदस्ति तत् समस्तमपि परमात्मनः सम्बन्धितमस्ति इति मत्वा एवास्माभिः व्यवहर्तव्यम् अन्येषां धने कदापि इच्छा न करणीय इति भावना अपि वेदेभ्यो वयं ज्ञातुं शक्नुमः,

**"तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्"**[४]

**४) कन्यानां शिक्षा–** ऋग्वेदे वयं पश्यामः कन्यानां शिक्षाया सुव्यवस्था निर्दिश्यते। पुत्रवत् तासामपि उपनयन–संसकारा भवन्ति स्म। वेदाध्ययनेऽपि तासामधिकारो निर्दिष्टः। अद्यतन–सर्वकारस्य "बेटी बचावो बेटी पढावो" इति घोषणा वेद–काल एव निर्देशिता–गृहस्थजीवन (विवाह) सम्बन्धि–विषयेषु तासां योग्यत्वमभीष्टमासीत्, वैदुष्यं सम्पाद्य ताः यज्ञादि कर्मणि, विद्या–विवादे, मन्त्रोपदेश–कर्मणि अपि प्रावर्तन्त। ऋग्वेदे बह्व्यः मन्त्रदर्शिकाः ऋषिकाः स्मर्यन्ते। श्रद्धाकामायानी, शची, यमी, इन्द्राणी, अदिति,..... प्रभृत्यो मन्त्रदर्शनेनैतासां गौरवं वैशिष्ट्यम् आदर्श–रूपत्वञ्च परिशील्यते।

---

२. अथर्ववेदे १६ / ६२ / ११

३. यजुर्वेदे ४० / ६–७

४. तत्रैव ४० / १

एवमद्यतन–बालिकाः, स्त्रियश्च वैदिक ऋषिका इव आदर्शरूपेण स्वीकृत्य सुशीलाः सुधीराः, समर्थाश्च भवेयुः।

५) **वसुधैव कुटुम्बकस्य भावना–** एषा भावना वेदत एव आगतास्ति। देशीया, विदेशीया वा एकस्यैव परमात्मनः पुत्राः खलु? तत्र किं कारणं, भेद–भावस्य, प्रथमम्– अभेददृष्टिः प्रवर्तते चेत् तदा जगदिदं स्वर्ग इव चकास्ति। ''अत एवोक्तम् **उदारचरितानांतु वसुधैव कुटुम्बकं**''[५]

६) **देशभक्तिः– ''माता भूमिः पुत्रोऽहं पृभिव्याः**[६] इत्यादिभिर्वेदमन्त्रैर वगम्यते यद् भारतभूमिरस्माकं माता। एवं पुत्रत्वेन मातुः रक्षणं अस्माकं परमं कर्तव्यम्। अत एव उच्यते **''वयं तुभ्यं बलिहुतः स्याम**''[७]

मातृभूमेः सङ्कट–निवारणार्थं प्राणार्पणेनापि मातृभूमिहित–सम्पादनं सर्वेषां कर्म। एवं मानवानां देशभक्तिः परमं कर्तव्यम्।

७) **गुरु–शिष्य–सम्बन्धः–** गुरुशिष्य–सम्बन्ध–विषये अथर्ववेदे निरूपितं यद् आचार्यः अध्येतृषु–मातृवत् पितृवच्च स्निह्यति व्यवहरति च यथा

**''आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।''**[८]

**तद् ब्रह्मचारी प्रायच्छत् स्वान् मित्रोऽध्यात्मनः।**[९]

छात्रस्य शास्त्र–द्वयं श्रम–तपश्च। तपः श्रमाभ्यां पुष्णाति लोकं सः।

**''ब्रह्मचारी समिधा–मेखलया श्रमेण लोकांस्तपसा पिपिर्ति।''**[१०]

एवं वेदेषु शिक्षायाः उद्देश्यरूपेण आध्यात्मिक–ज्ञानम्, आस्तिक्यम्, शारीरिक–मानसिक–बौद्धिक–समुन्नतिः छात्रेषु प्रतिपाद्यते। एवं सर्वविध–

---

५. महोपनिषदि ४/७६
६. अथर्ववेदे १२/२/१२
७. तत्रैव १२/१/६२
८. तत्रैव ११/५/३
९. तत्रैव ११/५/१५
१०. तत्रैव ११/५/४

समुन्नतिः अन्तेवासी सर्वदेवाधिवास–स्थानं सम्पद्यते। किन्तु अद्यतन समाजे–छात्राः केवलं प्रमाणपत्रस्य कृते एव विद्याभ्यासं कुर्वन्ति।

८) **आचार्यः–** आचार्यो नाम य आचारं ग्राहयति, छात्रोपयोगीम् विषयान् सङ्गृह्णाति, छात्र बुद्धिं विकासयति च, स आचार्यः।

**''आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते''**[११]

यः सदाचारः शिक्षणपूर्वकं छात्रेषु जितेन्द्रियत्वं पोषयति, स आचार्यः

आचार्यस्य स्वरूपम्ः– अथर्व वेदे आचार्यः यमः वरुणः सोम इत्युच्यते। आचार्यः अनुशासन–प्रियत्वात् यमः, न्यायाचरणाद् वरुणः, छात्राह्लादकत्वात् शीलसम्पन्नवाच्च सोमः।

९) **मानव जीवनम्** यजुर्वेदे प्रोक्तं यद् मानवस्य जीवनमेव कर्म। विना कर्मणा जीवनस्य निर्वहणमपि दुष्करः। अत एवोक्तम्

**''कुर्वन्नेह कर्माणि जिजीविषेच्छतं समाः''**[१२]

कर्मण्येव मानवस्याधिकारो भवति। न तु कर्म–फल–प्राप्तौ। अतः कर्म–फलासक्तिमनाश्रित्य कर्तव्यभावनयैव कर्म सम्पादनीयम्।

एवं नव–समाजेन वेदे स्थितान्, अखिल–भारतीय–सिद्धान्तान् अवश्यमद्यतनं कृत्वा स्वजीवनस्य सामाजिकजीवनस्य च रक्षणं कुर्यात् पुनरेकवारमस्माकं भारतं विश्वगुरुत्वं प्राप्नुयात् **'कृण्वन्तो विश्वमार्यञ्च'** इति मम अभिलाषः।

***

---

११. तत्रैव ११/५/१८

१२. यजुर्वेदे ४०/२

**डॉ० हेमु–महेश–राठोड**
आणन्दम् (गुजरातम्)

# सूत्राधार–बउरीमहाराणाविरचितं शिल्पशास्त्रम्

लोके चतुः षष्टिः कलाः प्रवर्तन्ते। तासु शिल्पकलाया अपि एका कलारूपेण परिगणना विद्यते। भारतीयस्थापत्यविद्यायाः परम्पराऽतीव प्राचीनाऽस्ति। यद्यपि भारतीयपुरातनपरम्परायां विद्यानामुल्लेखोऽस्ति, तत्र स्थापत्यविद्यायाः उल्लेखो न मिलति। अस्याऽभिप्राय एतादृशं कदापि नास्ति यद् भारतीयविद्यायां स्थापत्यविद्यायाः स्थानं महत्त्वञ्च नास्ति। वस्तुतोऽस्या विद्यायाः सम्बन्धः शालीयजीवनेन सहास्ति। यस्या आवश्यकता मानवेन एवं मानवसभ्यतया सह सनातनकालेनाऽस्ति। कतिपयविद्वांसः स्थापत्यवेदरूपेण अथर्ववेदस्य उपवेद इति स्वीकुर्वन्ति। यद्यपि वेदेषु स्थापत्यविद्यायाश्‍ चिन्तनसम्बन्धिबीजं निहितमस्ति, परन्तु अस्याऽधिकं परिष्कृतरूपं शूल्बसूत्रेषु दृष्टिगोचरं भवति। कस्याऽपि देशस्य प्राचीनस्थापत्यैस्तथा साहित्यद्वारैव तस्य देशस्य सांस्कृतिकं मूल्यं ज्ञायते। विद्याः कलाश्च देशस्यामूल्यं धनमस्ति। शिल्पस्थापत्यं मानवजीवनस्याऽतीवोपयोगि तथा महत्त्वपूर्णमङ्गमस्ति।

शिल्पशास्त्रं प्राचीनतमं शास्त्रं वर्तते। भारतीय–शिल्पकला प्राचीनतमा महत्त्वपूर्णा चाऽस्ति। अस्माकं देशे युग–युगान्तर–पूर्वं बृहन्नगराणां, दुर्गाणां, राजप्रासादानां तथा सेतूनां निर्माणं जातम्, सर्वमपि प्रवर्तमानयुगेऽपि सुरक्षितं दृश्यते। सैन्धव–सभ्यतासम्बन्धितावशेषानां कालनिर्धारणं पुरातत्त्व–विद्वज्जनाः प्रायः ५५०० वर्षाणि पूर्वं मन्यन्ते, इति भारतीयस्थापत्यकलाया विकासप्रमाणमस्ति। वास्तोः स्थापत्यस्य वा अस्माकं भारतवर्षे अधिकतमविकासो जातः तस्मात् कारणाद् एतद्विषयकविस्तृतलेखनस्य आवश्यकता जाता, तदा एतद्विषयकानामनेकेषांग्रन्थानां रचना जाता। तस्मात् केषाञ्चिद् ग्रन्थानां रचना–कालो निश्चितं ज्ञातमस्ति, परन्तु केचन ग्रन्थाः अनुपलब्धाः सन्ति तथा तस्य रचना–कालोऽपि निश्चितो नास्ति। भारतीयशिल्पस्थापत्यस्य (वास्तुविद्यायाः) प्रारम्भः कदा जातः इति निर्णयः

प्राचीनसाहित्याधारेण कर्तुं शक्यते।

शिल्पकलायां हस्तनिर्मितकलायाः एवं कल्पनायाः अद्भूतसामञ्जस्यं दरीदृश्यते। ऋग्वेदे शिल्पीनां कृते 'कारु' इति शब्दस्य प्रयोगः दृश्यते। यथा–

**कारुरहं ततो भिषग् उपलप्रक्षिणी नना।**
**नानाधियो चसूयवोऽनु गा इव तस्थिम्।।**[१]

कारुशब्देन सह अन्य–श्रमोपजीविनां परिगणनमपि भवन्ति स्म। शुक्राचार्यमतानुसारं मुख्य–विद्याः ३२ तथा कलाः ६४ मन्यन्ते। यत् कार्यं वाणीद्वारा वा शब्दद्वारा कर्तुं शक्यते तत् कार्यं विद्या तथा यत् कार्यं वाणीद्वारा वा शब्दस्य उपयोगं कृत्वा न भवति, किन्तु मनुष्यो मौनः (हस्तद्वारा) सङ्केतद्वारा कर्तुं शक्नोति तत् कार्यं कला इति ज्ञायते। शिल्पं–चित्रम् इत्यादिकाः कलाः। कला मौनावस्थां कर्तुं शक्यते अत एताः सर्वाः कला इति ज्ञायते।

शिल्पकलाया वेद ब्राह्मण–रामायण–महाभारत–पुराणा–बौद्ध–जैनागमादिषु प्रमाणभूतेषु ग्रन्थेषु वर्णनं प्राप्यते। ऋग्वेदे वास्तोष्पतेः स्तुतिर्दृश्यते। पाषाणनिर्मितानि १०० नगराणां सप्रमाणं भवनरचनायाः समुल्लेखो दृश्यते। अथर्ववेदस्य सूक्तेषु स्थापत्यकला, गृहनिर्माणस्य नियमा दृश्यन्ते। गृह्यसूत्रेष्वपि गृहारम्भस्य धार्मिकक्रियायाश्च तत्त्वानि वर्तन्ते। आश्वलायन–गोभिलादिगृह्यसूत्रेषु भूमिपरीक्षादिरूपं वर्णनं विद्यते। बौधायनजैमिनीयपारस्करभारद्वाजादि–गृह्यसूत्रेषु शिल्पविद्या वर्णिता दरीदृश्यते। अथर्ववेदस्योपवेदः स्थापत्यवेदो मन्यते। अथर्ववेदीये वास्तुसूत्रोपनिषदि शिल्पविद्याप्रवर्तकाणां नामोल्लेखः प्राप्यते। अथर्ववेदे शिल्पीनां कृते रथकारः, तक्षा, त्वष्टा, तष्टा इति शब्दप्रयोगाः प्राप्यन्ते। यथा–
**ये धीवानो रथकाराः।**[२] **त्वष्टास्मै वज्रं स्वर्यं ततक्ष....।**[३]

शिल्पशब्दस्य व्युत्पत्तिः शिल्'+पक् इति। शिल्प–शब्दस्यार्थः कला, ललितकला, यान्त्रिकिकला इति मन्यन्ते। संस्कृतसाहित्येऽपि

---

१. ऋग्वेदे ८/११२/३
२. अथर्ववेदे ३/५/६
३. तत्रैव २/५/६

कलाकौशल्यतायाः कृते शिल्पशब्दस्य प्रयोगः प्राप्यते। यथा–

**पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः।**
**जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य।।**[४]

सूत्रधारमल्लकृतप्रमाणमञ्जरी–सञ्ज्ञके ग्रन्थे काष्ठमानं, रचनादि–विषयाः शिल्पकलान्तर्गतं प्रोक्ताः। यथा–

**अथोच्यते सारतरस्य सारं काष्ठोदयालिन्दसमुद्भवं तम्।**
**मानं समस्तं जयवीक्ष्यदृष्टं सुशिल्पकं सर्वजनोपकृत्ययम्।।**[५]

शिल्पकृते देवशिल्पमेवं द्रविडशिल्पमिति रूपेण द्विधा विभाजनं कृतम्। विश्वकर्माः देवशिल्पस्य प्रणेताः तथैव द्राविडशिल्पस्य प्रणेता मुख्यतः मय इति मन्यते। तथापि शिल्पमिति शिल्पम् विश्वकर्मीयग्रन्थेषु मुख्यतो हस्तेन सम्पादितानां कलानामुल्लेखः शिल्परूपेण कृतः। अतः अन्ते वास्तुशास्त्रीयग्रन्थेष्वेते कलाः विश्वकर्मीयरूपेण स्वीकृताः। शिल्पशास्त्रस्य महत्त्वं रामचन्द्रकौलाचार्यो दर्शयति यथा–

**शिल्पशास्त्रं महत्पुण्यं विश्वकर्मानुशासनम्।**[६]

तथैतावत् शिल्परत्नकोशग्रन्थेऽपि शिल्पप्रशंसा विद्यते। यथा–

**शिल्पं हि परमपूज्यं सर्वदर्शनलक्षणम्।**
**सर्वप्रमाणरूपाय साकारतत्त्वमेव च।।**

**बहुधा शिल्पं जगति ख्यातं धात्रा विकल्पितम्।**
**स्थापकज्ञानं तन्मध्ये श्रेष्ठं वदन्ति स्थापकाः।।**[७]

अर्थात् शिल्पमेवं सर्वदर्शनलक्षणेषु परमपूज्यमस्ति। कारणं शिल्पे

---

४. मालविकाग्निमित्रे १/६
५. प्रमाणमञ्जर्याम्–२
६. शिल्पप्रकाशे २/७८२
७. शिल्परत्नकोशे ३–४

सर्वप्रमाणरूपमेवं सिद्धान्ततत्त्वं साकाररूपेण विद्यते। लोके बहुधा शिल्पं प्रख्यातं तन्मध्ये स्थापत्यज्ञानं श्रेष्ठमस्ति इति स्थापकाः कथयन्ति।

**ग्रन्थकर्तुः परिचयः**

उडीसायां महापात्रं महाराणा जातिः शिल्पीवर्गे स्वीकृतमस्ति। तेषां समीपे अनेके शिल्पग्रन्थाः आसन्। पुरी–भुवनेश्वरादिस्थानेषु स्थितानि अनेकमन्दिराणि तेषां श्रम–सङ्कल्पस्य परिचायकाः सन्ति। अधुनाऽपि तत्र केषाञ्चित् शिल्पीपरिजना निवसन्ति। याजपुरनगरे शिल्पीपरिजनाः विद्यमानाः सन्ति। एतस्यां परम्परायां बउरीमहाराणामहोदयोऽस्ति। बउरीमहाराणाः शिल्पशास्त्रमितिग्रन्थस्य सम्पादनं कृतम्। वस्तुत एष ग्रन्थो विश्वकर्मकृतो मन्यते। बउरीमहाराणा केवलमस्य उडीया भाषायामनु अनुवादः कृतवान् इति मन्यते।[८]

अस्य ग्रन्थस्य प्रथमं सम्पादनम् ऑग्लानुवादश्च ई.स. १९२७ तमे वर्षे शान्तिनिकेतने प्रोफेसर फणीन्द्रनाथबोसः कृतवान्। प्रो. फणीन्द्रनाथः ई.स. १९२३ तमे वर्षे प्रकाशितं शिल्पसारनामकं ग्रन्थय्म् उडीयालिप्यां कटक–प्रिन्टिंग–कम्पनीतः प्राप्तवान्। शिल्पसारग्रन्थः अस्य शिल्पशास्त्रनामकस्य ग्रन्थस्य एकः पाठ आसीत्।[९] प्रो. बोसः अस्य ग्रन्थस्य मातृकाणां परिचयः निम्नलिखितरूपेण प्रोक्तः

प्रथमा मातृका उडीसायाः बन्तालीग्रामस्य करुणिमहाराणामहोदयस्य पुत्रः नीलकण्ठमहाराणा रचितवान्। ग्रन्थस्य प्रारम्भे शिल्पश्च चान्ते शिल्पसदाजयः इति कथितमस्ति। एवञ्च द्वितीयायां मातृकायां भुवनप्रवेस इति नाम दीयते। तथा एष ग्रन्थो नैमिषारण्यतीर्थे विश्वकर्मा–मुनिनां संवादरूपेण लिखितंमस्ति। अस्य प्रारम्भ एतादृशा अस्ति यथा– 'श्री गणेसाए प्रणम्य अविधनमृत्यु इति श्रीनउमिसारण्ये भुवनप्रवेसे विश्वकर्मामुनि–संवादे।' एषो ग्रन्थः पथुरीशाली, पुरीनगर्याः गोविंदमहाराणामहोदयस्य पुत्रेण

८. शिल्पशास्त्रे पृ० ४

९. तत्रैव पृ. ५

बाबाजीमहाराणामहोदयेन विरचितोऽस्ति।[१०]

प्रो. बोसस्य कृतेः प्रकाशनं पञ्जाब–ऑरियेन्टल–सीरीजतो जातम्। परन्तु एतस्मिन् अधिकः पाठः अद्यावधि पर्यन्तमनुपलब्धः। एवमेतस्य हिन्दीपाठोऽपि उपलब्धो नासीत्। एतत् चिन्तयित्वा उदयपुरम् (राजस्थानम्) इति नाम्नि नगरे डॉ० श्रीकृष्णः जुगनू महोदयः अस्य ग्रन्थस्य पुनःसम्पादनमथ च हिनदीभाषानुवादं कृत्वा चौखम्बा–संस्कृत–सीरज ऑफिस, वाराणसीतः ई. स. २००८ तमे वर्षे प्रकाशितं कृतवान्।[११]

## शिल्पशास्त्रम् इति नाम्नि ग्रन्थे वर्णित–विषयाः

शिल्पवास्तुकला–क्षेत्रे शिल्पानामाधारिता नैका ग्रन्थाः प्राप्यन्ते। तेषु शिल्पकलादीपिका, शिल्पग्रन्थः, शिल्पनिघण्टुः, शिल्पदीपिका, शिल्पदीपकः शिल्परत्नम्, शिल्परत्नकोशः, शिल्पप्रकाशः, शिल्पलेखः, शिल्पशास्त्रम्, शिल्पशास्त्रसारसंग्रहः, शिल्पसारः, शिल्पकौमुदी, शिल्पार्थशास्त्रम्, नारदीयशिल्पम्, सारस्वतीयशिल्पशास्त्रम्, सनत्कुमारशिल्पशास्त्रम्, काश्यपशिल्पम्, अगत्स्यशिल्पम् अथवा सकलाधिकारः, लघुशिल्पज्योतिषः, चित्रकर्मशिल्पशात्रम् इत्यादि ग्रन्था विशेषता समुल्लेखनीयाः।

शिल्पवास्तुविषयकेषु प्राचीनेषु आधारभूत–ग्रन्थेषु मुख्यतो मयमतम्, मयदीपिका, मयशास्त्रम्, मानसारः, अपराजितपृच्छा, विश्वकर्मीयग्रन्थाः, आगमग्रन्थाः, मनुष्यालयचन्द्रिका, समराङ्गणसूत्रधार इत्यादयो ग्रन्थाः उल्लेखनीयाः।

प्रस्तुते शिल्पशास्त्रम् इति नामके ग्रन्थे भूमिपरीक्षणतआरभ्य गृहादिनां निवेश–पर्यन्तं, निर्माणविधानमथ च संयोजनादीनां विवेचनं विद्यते। अस्मिन् ग्रन्थे पञ्च अध्यायाः सन्ति। शिल्पशास्त्रम् इति नाम ग्रन्थः १५ शताब्द्याः प्रारम्भकाले लिखिते ज्योतिर्निबन्धे समुद्धृतः। ज्योतिर्निबन्धग्रन्थस्य केचन श्लोकाः एतस्मिन् ग्रन्थे उद्धृतः। अस्य ग्रन्थस्य पाठः प्राचीनः प्रतीयते। एतस्मिन् ग्रन्थे दारुकर्मविधानम् (काष्ठशिल्पम्) अपि प्राप्यते।

---

१०. तत्रैव पृ० ५

११. तत्रैव पृ० ६

शिल्पशास्त्रमिति ग्रन्थस्य वास्तुभूपरीक्षणषोडशभूमिलक्षण–नामको प्रथमोऽध्यायो वर्तते। प्रथमेऽध्याये सूत्रधारबउरीमहाराणामहोदयो ग्रन्थस्य प्रारम्भे अम्बिकापुत्रहेरम्बं तथा सर्वदेवपूजितं विघ्नेशं च नमस्कारोति। तदनन्तरं वास्तोः (शिल्पस्य) मुख्याधारं भूमि–परीक्षणं कथं करणीयमिति निरूप्य भूमिलक्षणानि विवेचितानि। तत्रैव चतुर्विधभूमेर्वर्णविचारो विहितः–

**ब्राह्मणा क्षत्रिया वैश्या शूद्रा भूमिश्चतुर्विधा।**

**शुक्ला रक्ता तथा पीता कृष्णा वर्णैरिति क्रमात्।।**[१२]

अपराजितपृच्छाग्रन्थेऽपि भूवर्णानां विचारो वर्तते। यथा–

**श्वेता च ब्राह्मणी भूमिः रक्ता वै क्षत्रियः स्मृता।**

**पीतवर्णा भवेद्वैश्या शूद्री तु कृष्णवर्णिनी।।**[१३]

गन्धानुसारेण भूमि–लक्षणमपि वर्णितं शिल्पशास्त्रे–

**यथा घृतगन्धा ब्राह्मणीभूमिः, रक्तगन्धा च क्षत्रिया,**

**क्षारगन्धा भवेत् वैश्या, शुद्रा च पुरीषगन्धजा।**[१४]

विश्वकर्मावास्तुशास्त्रानुसारं गन्धमधिकृत्य भूमिलक्षणमेवं निगदितम्–

**मधुगन्धा पुष्पगन्धा सर्पिगन्धा च भूरपि।**

**स्थिरवर्णा च भूश्शस्ता सर्ववास्तुषु कीर्तिता।**[१५]

तथैव मयमतम्–मानसार–समराङ्गणसूत्रधार–विश्वकर्माप्रकाशादिषु ग्रन्थेष्वपि भूर्लक्षणानि प्रस्तूय भू परीक्षणमित्यादीनां विस्तृतरूपेण वर्णनं प्राप्यते। रसोचितं भूर्लक्षणमपि वर्णितं दृश्यते। प्रथिब्याः दृढतायाः परीक्षणार्थं भूपरीक्षाया वर्णनमपि बउरीमहाराणा कृतवान्। भूपरीक्षार्थं भुमौ तिलवपननिर्देशः, दीपस्थापनविधिः शुभाशुभफलसहितं वर्णितमस्ति। यथा–

---

१२. शिल्पशास्त्रे १/५

१३. अपराजितपृच्छायाम्, ५१/५०

१४. शिल्पशास्त्रे १/६

१५. विश्वकर्मवास्तुशास्त्रे ५/२१

**वास्तोर्मध्ये तु विवरं कृत्वा बाहुप्रमाणतः।**
**दीपं तत्र स्थापयित्वा चिन्तयेत् च फलादिकम्।।**[१६]

वास्तुकर्मणि आकृत्यानुसारं षोडशधा भूमिः शुभाशुफलसहितं निरूपिता। यथा–

(१) आयताकारा–सर्वसिद्धिप्रदा (२) चतुरस्र–धनागमः (३) वृत्ताकारा–पुष्टिदायिका (४) भद्रासनाकारा–अर्थकारी (५) चक्राकारा–दारिद्र्यदा (६) विषमबाहुः–शोकदायका (७) त्रिकोणाकारा–राजभीतिकरा (८) शकटाकृति–धनक्षयकारिणी (९) दण्डाकारा–पशुनाशकारी (१०) पणवस्थाना–नेत्रनाशिनी (११) मृदङ्गाकारा–भार्यानाशिनी (१२) बृहन्मुखी– सुखनाशिनी (१३) व्यजनाकारा–वित्तनाशिनी (१४) कूर्मपृष्टाकारा– धनलाभप्रदा (१५) धनुषाकारा–चौरभयकारी (१६) सूर्पाकारा–दारिद्रता कारिणी च।[१७] एवञ्च श्रेयोऽभिलाषिभिः संस्थानं वास्तुलक्षणं शुभाशुभं चिन्तयित्वा आवासनिर्माणं करणीयम्। तथैव यथावत् श्लोकाः राजाभोजप्रणीते राजमार्तण्डग्रन्थेऽपि प्राप्यते। शिल्पप्रकाशग्रन्थेऽपि भूम्याः आकृत्यानुसारेण भेदाः दृश्यन्ते। विश्वकर्माप्रकाशग्रन्थेऽपि भूम्याः आकृत्यानुसारेण शुभाशुभफलं विस्तृतरूपेण वर्णितं दृश्यते। वास्तुमुहूर्तान्तर्गतं भूम्याः शुभाशुभ–फलानि, तिथिशुद्धिः वारशुद्धिः, ताराबलं, नक्षत्राणां शुभाशुभ–फलानि, काष्ठनिर्णयः, काष्ठग्रहणे मुहूर्ताः, वास्तुकर्मणि मासनिर्णयः, शुभाशुभ–फलसहितं निरूपितम्।

शिल्पशास्त्रस्य गृहबन्धनागप्रमाणवास्तुलक्षणपूर्वकं आयविचारः, नक्षत्रानयम्, गृहायुज्ञानम्, पञ्चतत्त्वानयनविधिः, राश्यानयनम्, वास्तुनागविचारः, वास्तुनागाङ्गनामानि इत्यादयो विषया विशदतया निरूपिताः। आयादिनिर्णयो वास्तुशास्त्रस्य एकः अनिवार्यः पारिभाषिकः विषयोऽस्ति। भवनादिविधाने तस्य विचारः परमावश्यकमस्ति–

१६. शिल्पशास्त्रे–१/१३
१७. तत्रैव १/१६,१७,१८

**व्यासेन गुणितं दैर्ध्यम्आभिर्भाजितं पुनः।**
**शेषं ध्वजादिकं ज्ञेयं पूर्वादिभवनाष्टके।।**[१८]

अर्थात् भवनस्य क्षेत्रफलम् ÷ ८ = शेषाङ्क आयः। दीपार्णवग्रन्थेऽपि आयानयनार्थं सूत्रम् दर्शितमस्ति। यथा–

**धाम्नश्च दीर्घतो व्यासं गुणयेदटभाजिते।**[१९]

आयनामानि निम्नदर्शित–कोष्ठकरूपेण द्रष्टव्यानि–

| क्रमः | आयः | दिशा | फलम् | आयूपयोगः |
|---|---|---|---|---|
| १. | ध्वजः | पूर्वदिशा | कीर्तिः | देवगृहम् |
| २. | धूम्रः | आग्नेयः | शोकः | यज्ञशाला |
| ३. | सिंहः | दक्षिणः | विजयः | प्रेक्षागृहम्, श्रीगृहम् |
| ४. | श्वानः | नैऋत्यः | वैरम् | कुट्टणिशाला |
| ५. | वृषः | पश्चिमः | धनागमः | अन्तःपुरम् |
| ६. | खरः | वायव्यः | निर्धनता | पशुशाला |
| ७. | गजः | उत्तरः | सुखप्राप्तिः | भाण्डारगृहम् |
| ८. | ध्वांक्षः | ईशानः | रोगः | आयुधशाला |

श्रीविश्वकर्माप्रणीते दीपार्णवग्रन्थे गृह–गृहस्वामीमेलापके वास्तुशास्त्रस्य एकविशंति अङ्गानि दर्शितानि। दीपार्णवग्रन्थे आयानां विविधप्रयोगा विस्तृतरूपेण वर्णिताः। केषुचिद् ग्रन्थेषु आयादेरनन्तर्गतं परिगणिताः षड् विषयाः सन्ति तेन कारणेन ते आयादि–षड्वर्ग इति ज्ञायते। भिन्न–भिन्न–ग्रन्थेषु किञ्चिद् भिन्नता दृश्यते। राजवल्लभ–समराङ्गणसूत्रधार–अपराजितपृच्छा आदि ग्रन्थेषु आयादि–षड्वर्गाणां वर्णनं दृश्यते।

---

१८. तत्रैव २/१
१९. दीपार्णवे १/१२

तथैव नक्षत्रानयनविधानमपि अस्मिन् ग्रन्थे प्राप्यते। यथा–

**अष्टभिर्गुणितं पिण्डमृक्ष–भागेन हारयेत्।**
**शेषमृक्षं विजानियादश्विन्यादि–क्रमेण।।**[२०]

अर्थात् क्षेत्रफलम् X ८ ÷ २७ = शेषाङ्को नक्षत्रम्–

तदनन्तरं गृहायुज्ञानं कथं भवेदिति विधानमपि दर्शितमस्मिन् ग्रन्थे–

गृह क्षेत्रफलम् X ८ ÷ ६० = शेषसंख्या गृहायुः।

सूत्रधारमण्डने राजवल्लभग्रन्थे अपि गृहायुविचारः कृतः। यथा–

**हस्तात्मकं क्षेत्रफलं गजाहतं संवत्सरैर्भाजितलब्धकं यत्।**
**तत्खेन्दुगुण्यं भवनाय जीवितं यच्छेषकं भूतहृतं विलीयते।।**[२१]

गृहायुः पूर्तौ पृथ्व्यादिपञ्चतत्त्वज्ञानम्–

**पृथिवी–जल–तेजांसि–वायुराकाश एव च।**
**पञ्चभूतायते तत्र भग्नं दाहादि जायते।।**[२२]

तथैव राजवल्लभग्रन्थेऽपि गृहायुविचारो विद्यते। यथा–

**पृथिव्यापोऽनलो वायुराकाशमिति पञ्चभिः**
**गृहस्यायुषि सम्पूर्णे विनाशो भवति ध्रुवम्।**
**जीर्णं पतति भूतत्वे तोयाग्न्योः स्यात्तदुद्भवम्**
**वायो रोगस्तथाऽऽकाशे शून्यतामेति मन्दिरम्।।**[२३]

उपर्युक्त–गृहायुज्ञाने ० तः ४ शेषसंख्यानुसारं क्रमशः १ शेषः प्राप्यते तदा पृथ्वीद्वारा गृहनिवाशो भवति। यदा २ शेषः प्राप्यते तदा जलेन गृहनिवाशो

२०. शिल्पशास्त्रे २/६
२१. राजवल्लभवास्तुशास्त्रे ३/२५
२२. शिल्पशास्त्रे २/८
२३. राजवल्लभवास्तुशास्त्रे ३/२६

भवति। यदा ३ शेषः प्राप्यते तदा अग्निद्वारा, ४ शेषे वायुद्वारा तथा ५ शेषे आकाशतत्त्वद्वारा गृहं शून्यं भवति। व्ययानयनमपि अस्मिन् ग्रन्थे संक्षिप्तरूपेण दर्शितमस्ति। दीपार्णवग्रन्थे व्ययविचारो विस्तृतरूपेण विद्यते। यथा–

**नक्षत्रं वसुभिर्भक्तं यच्छेषं तद् व्ययो भवेत्।**
**एकैकस्या संस्थाने व्ययश्च विविधः स्मृतः।**[२४]

अर्थात् क्षेत्रफलम् x ८ ÷ २७ = शेषाङ्को व्ययः।

समराङ्गणसूत्रधारग्रन्थे व्ययाः त्रिधा परिकल्पिताः। यथा–

**पिशाचो राक्षसो यक्ष इति त्रेधा व्ययो मतः।**
**साम्याधिक्यन्यूनताभिरायतः स्याद् यथाक्रमम्।।**[२५]

पैशाचो, राक्षसः, यक्षश्च इति त्रयो व्ययाः। यथोक्तं त्रिधा व्ययाः दीपार्णवग्रन्थे विश्वकर्माचायोऽपि कथयति। गृहे आयस्य अपेक्षया यदा व्ययः अधिको भवेत् तदा राक्षसव्ययः इति कथ्यते। आयस्य अपेक्षया व्ययः न्यूनं भवेत् तदा यक्षायः, तथा आयः एवं व्ययः समे तदा पैशाचव्ययः स्मृतः। यक्षव्ययो धनधान्यादिसुखदायकः भवति। शिल्पदीपकग्रन्थेऽपि यथोक्तवर्णनं प्राप्यते।

तत्पश्चाद् भूखातकर्मणि वास्तुनागविचारः सूत्रधारबउरीमहाराणा दर्शयति–

**भद्रादौ तु शिरः पूर्वे मार्गादौ दक्षिणे शिरः।**
**फाल्गुनादौ शिरः प्रत्यक् ज्येष्ठादावुत्तरे शिरः।।**[२६]

वास्तुनागस्य शिरस्थित्योपरि विचारोऽत्र क्रियते। भाद्रप्रदाश्विनकार्ति–कमासेषु वास्तुनागस्य शिरः पूर्वदिशायां भवति। मार्गशीर्षपौषमाघमासेषु वास्तुनागस्य शिरः याम्याम्, फाल्गुनचैत्रवैशाखमासेषु पश्चिमदिशायां तथा ज्येष्ठआषाढश्रावणमासेषु वास्तुनागस्य शिरः उत्तरदिशायामवस्थितमस्ति।

---

२४. दीपार्णवे १/३७

२५. समराङ्गणसूत्रधारे २६/३६–३७

२६. शिल्पशास्त्रे–२/१६

वास्तुनागस्य स्थित्यानुसारेण तस्य शिरोपरि, पृष्ठोपरि तथा पुच्छोपरि खातकर्मं कदापि न करणीयम्। शिरोपरि खातरकणे पत्न्याः वं सन्तानस्य च विनाशो भवति, हृदये खनने श्रीसम्पत्तिः प्राप्यते, जठरे खनने सर्वसुखप्राप्तिः भवति, नाभौ खातकरणं अतिशयभयकारकः, गृह्याङ्गे रोगप्राप्तिः जानुप्रदेशे दीर्घप्रवासः तथा पृच्छदेशे खनने मृत्युप्राप्तिर्भवति। वास्तुनागस्य वामकुक्षौ खातकर्मं शुभं भवति।

अस्मिन् शिल्पशास्त्रमिति ग्रन्थे सूत्रलक्षणगृहारम्भकाले निमित्तम् इति तृतीयोऽध्यायो वर्तते। अत्र तृतीयेध्याये गृहारम्भकाले निमित्तानां शुभाशुभफलानि प्रतिपादितानि। गृहनिर्माणार्थं खातकर्मावसरे ध्वजवस्त्रपताकादीनां दर्शने धनप्राप्तिर्भवति। जलपूर्णकुम्भे कनकादिवित्तं प्राप्यते–

**शत्रुक्षयं वाद्यघोषे वेदघोषे भवेच्छुभम्।**
**ज्योतिः शास्त्र–कथायां तु वर्द्धते गृहिणो धनम्।।**[२८]

गृहारम्भकाले यदि हीनाङ्गो, भिक्षुकश्चैव वन्ध्या, रोगार्त्तिखञ्जकौ दृश्यते तदा गृहकर्तुः मरणं भवति। तथैव सूत्रपातकाले सूत्रच्छेदने मृत्युतुल्यदुःखादि प्राप्यते। अतो गृहशान्त्यर्थं विधिविधानेन शान्तिहोमः करणीयः। सूत्रविस्तीर्यमाने यदि रोदनं श्रूयते तदा नाभिमाने मुण्डमालायाः शल्यं विनिर्दिशेत्। सूत्रपातकाले गजशब्दो भवेत् यदा तत्र गजस्यास्थिः तथा हयशब्दो यदा भवेत् तत्राश्वास्थिः विजानीयाद्, तत्फलं धनहानिः। तथा यदि धेनुः शब्दायते तदा गवास्थीन्यत्र प्राप्यते। तेन मृत्युर्वास्तुपतेः भवेत्।[२९] शिल्पप्रकाशग्रन्थेऽपि यथोक्तं वर्णनं प्राप्यते। यथा हि–

**अशुभं यदि तत्स्थाने सूत्रं सङ्कीर्णं जायते।**
**वर्जयेत् तादृशीं भूमिं श्वापदकुलस्थानवत्।।**

---

२७. शिल्पशास्त्रे ३/१,३

२८. तत्रैव ३/२

२९. तत्रैव ३/३–६

**सूत्रधारणकाले चेत् विकटः शब्दो जायते।**
**परित्याज्या तदा भूमिर्नात्र अन्या विचारणा।।**

**सूत्रविस्तारमात्रेण सुगन्धादि भवेद् यदि।**
**शुभक्षेत्रमिति ख्यातं प्रासादार्थं मनोहरम्।।**[30]

अस्मिन् ग्रन्थे मङ्गलारोपणविधि सञ्ज्ञकः चतुर्थोऽध्यायः वर्तते। अत्र प्रथमं शल्यविचारः संक्षिप्तरूपेण प्रतिपादितमस्ति। यथा हि–

**भस्मास्थि–काष्ठमङ्गारं तुषं बालं कपालकम्।**
**रक्तपुत्तिकदन्तं च मृद्भाण्डास्थीति यत्र वै।**
**तत्र वासो न कर्तव्यः कृते कीर्तिधनक्षयम्।।**[31]

उपर्युक्तश्लोके प्रोक्तं यच्छल्ययुक्त–भूमौ गृहनिर्माणं न करणीयम्। तत्रावासे कीर्तिधनक्षयं भवति। तथा अन्यच्च इष्टकायामर्थलाभः–पाषाणे सर्वसम्पदः, सर्पादौ निधनं तथा अङ्गारे च कर्तुः कुलक्षयं भवति। ज्योतिर्निबन्धोक्तं शल्यज्ञानमेवं शल्यनिष्कासनविधिः विस्तारपूर्वकं बृहद्वास्तुमालायां विद्यते। यथा–

**स्मृत्वेष्टदेवतां प्रश्नवचनस्याद्यमक्षरम्।**
**गृहीत्वा तु ततः शल्याशल्यं सम्यग्विचार्यते।।**[32]

तत्पश्चादस्मिन् ग्रन्थे भूम्याः प्लवविचारः प्रस्तुतः। यथा–

**पूर्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः।**
**दक्षिणो मृत्युदश्चैव धनहा पश्चिमप्लवः।।**[33]

बृहत्संहिता, वास्तुसौख्यं, मनुष्यालयचन्द्रिका, समराङ्गणसूत्रधारः,

---

३०. शिल्पप्रकाशे १/५२–५४
३१. तत्रैव ४/१
३२. बृहद्वास्तुमालायाम्, पृ० ३२, श्लोकः १६६
३३. शिल्पशास्त्रे ४/३

युक्तिकल्पतरु, मयमतम्, मानसागरीत्यादिषु सर्वेषु वास्तुशास्त्रीय–ग्रन्थेषु भूप्लवविचारो विद्यते। बृहद्वास्तुमालायामष्टदिक्प्लवस्य निर्णयो निम्नलिखितरूपेण शुभाशुभफलसहितं वर्णितं वर्तते। यथा–

**श्रियं दाहं तथा मृत्युं धनहानिं सुतक्षयम्।**
**प्रवासं धनलाभं च विद्यालाभं क्रमेण च।।**

**विदध्यादचिरेणैव पूर्वादिप्लवतो मही।**
**मध्यप्लवा मही नेष्टा न शुभा प्लवतत्परा।।**[३४]

अनन्तरं गृहे शुभाशुभद्रुमादीनां विचारोत्प्यत्र दृश्यते। यथा गृहस्य पूर्वदिशायाम् अश्वत्थं, दक्षिणे तिन्तिडी, पश्चिमे वटं, तद्वदुत्तरे उदुम्बरं वर्जितमस्ति तथा च ऐशान्ये रक्तपुष्पं, आग्नेये क्षीरपादपं, नैर्ऋते कण्टकं चैव वायव्ये शाल्मलि निषिद्धमस्ति। गृहसमीपे यत्रतत्र स्थिताः बिल्वदाडिम्बकेशराः तथा पनसो नारिकेल इत्यादयो वृक्षाः नित्यशः शुभं कुर्वन्ति। वृक्षायुर्वेदे, राजवल्लभग्रन्थे शुभाशुभवृक्षनिर्णयो वर्णितं वर्तते। यथा–

**सदुग्धवृक्षाः द्रविणस्य नाशं**
**कुर्वन्ति ते कण्टकिनोऽरिभीतिम्।**

**प्रजाविनाशं फलिनः समीपे**
**गृहस्य वर्ज्याः कलधौतपुष्पाः।।**[३५]

अस्मिन् ग्रन्थे गृहप्रवेशविधिः नामकः पञ्चमोऽध्यायो वर्तते। प्रारम्भे गृहप्रवेशार्थं सूर्यसङ्क्रान्त्यानुसारेण गृहप्रवेशद्वारस्य दिशा निर्धारणं कथं करणीयमिति दर्शितमस्ति। अस्मिनध्याये विषयेऽस्मिन् उडियापाठः प्रस्तुतः। यथा हि–

**ब्राह्मणे सन्तुष्ट कराइ। बन्धु कुटुम्बे स्नेह वहि।।**
**मङ्गल उत्सव कराइ। गृहप्रवेश हेव वांइ।।**

---

३४. बृहद्वास्तुमालायाम्, पृ० ३२ श्लोकौ ३५, ३६

३५. राजवल्लभवास्तुशास्त्रे १/२८

**श्रीमत भागवत थिव। सेठारे पठन होइव।।**

**जगनाथ कुं सुमरिव। मणोहि किछि कराइव।।**

**एरूपे ये नर करइ। केवेहें लक्ष्मी न छडाइ।।**

**विपत्तिमान पलाइवे। सुदर्शन रक्षा करिवे।।**[३६]

अर्थात् नवीनभवनस्य प्रवेशोत्सवे, मङ्गल–संस्कारकाले सर्वप्रथमं विप्रजनां तोषणं करणीयम्। बन्धु–परिजनेभ्यः सम्मानं देयम्। नूतनगृहप्रवेशमङ्गलोत्सवप्रसङ्गे श्रीमद्भागवतमहापुराणस्य पारायणं कारयित्वा भगवतो जगन्नाथस्य स्मरणं कृत्वा तं प्रति किञ्चिद् अर्पण–मनोरथस्य सङ्कल्पंः करणीयः। यः सङ्कल्पबद्ध उत्सवः कारयति तस्य गृहे सर्वदा लक्ष्मीः निवासं करोति। गृहपतिः विपत्तिमुक्तो भवति भगवतः सुदर्शनचक्रः तस्य रक्षां करोति। अनन्तरं बउरीमहाराणामहोदयो लिखति–

**नीलाद्रिपति पादे ध्यान। निरते रहु मोर मन।।**

**शिल्पलक्षण पदकेते। कहिलि एहा मुंहि गीते।।**

**सुजने मो दोष न धर। बाउरी महाराणा छार।।**[३७]

बउरीमहाराणा कथयति नित्यं मम ध्यानो नीलाद्रिपतिप्रभुपादे अस्ति। अत्र शिल्पीलक्षणं पदबद्धं दर्शयामि, अहम् अकिञ्चनमस्मि, लेखने यदा त्रुटिः स्यात् तदा सुज्ञजनैः क्षन्तव्यमिति बउरीमहाराणामहोदयः लिखति। शिल्पीलक्षणम्–

**शिल्पिलक्षणकु येवे विचारिव।**
**विसिक्रमा मेरुकु कहुँ अछन्ति।।**

**हे मेरु शुन! आचारवन्त होइव। शुचिवन्त होइव।।**

**तिरि पुंस घेनि थेव। पुरुष वछा धरि थेव।**

---

३६. शिल्पशास्त्रे ५/५१–५६

३७. तत्रैव ५/५७–५८

**एमन्त होइ शुभ पूजा कराइब।**
**ब्राह्मणवरण, विसिक्रमा वरण।।**

**नवग्रहवरण। एतेक वरण करिब।**

**एतेक वरण काले अश्वमेधधर्म होइ।।**

**हीन आचार्यं कु न डाकिव।**
**हीन शिल्पि विन्धानिकि न डाकिव।।**

**विफलनिन्दा होइ। से कीर्ति नपुंसक कीर्ति होइ।।**[३८]

अत्र विश्वकर्मोक्त–शिल्पीलक्षणोपरि विचारः प्रस्तुतोऽस्ति। यजमानाः नित्यं आचारवन्तः शुचिवन्तः भवेयुः। माङ्गलिककार्याणि पुत्र–पौत्रादिकसहितं करणीयानि। ब्राह्मणविश्वकर्मानवग्रहादीनां पूजां करणीया। अनेन अश्वमेधयज्ञसमानं फलं प्राप्यते। यज्ञप्रतिष्ठादि–प्रसङ्गे हीनाङ्गाचार्याणां वा हीनशिल्पीनां चयनं कदापि न करणीयम्। तेन सर्वकार्याणि विफलानि जान्यते तथा पौरुषहीनता अकीर्तिश्च प्राप्यते। शिल्पीलक्षणं महाभारत–हरिवंशपुराणं–समराङ्गणसूत्रधारः–मानसार–वास्तुविद्या–मयमतम्–मनुष्यालयचन्द्रिका आदि– ग्रन्थेषु विस्तारपूर्वकं वर्णितं विद्यते। शिल्पिनो लोके चतुर्धा वर्तन्ते। मयमतानुसारम्–

**भवन्ति शिल्पिनो लोके चतुर्धा स्वस्वकर्मभिः।**

**स्थपतिः सूत्रग्राही च वर्धकिस्तक्षकस्तथा।**

**प्रसिद्धदेशसङ्कीर्णजातिजोऽभीष्टलक्षणः।।**[३९]

अर्थात् (१) स्थपतिः, (२) सूत्रग्राही (३) वर्धकिः, (४) तक्षकः इति। एते सर्व एव स्थापत्यादि–कर्मणि प्रसिद्धस्थानतः, सङ्कीर्णजात्युत्पन्नाः एवं च स्वकर्मषु अभीष्टगुणयुक्ताः भवेयुः। अस्मिन् ग्रन्थे पञ्चमेध्याये

---

३८. तत्रैव– अ० ५, पु० ४३–४४

३९. मयमते ५/१३–१४

विश्वकर्माप्रकाशोक्तं गृहप्रवेशविधानं क्षेपकरूपेण सम्पादकः डॉ० श्रीकृष्ण जुगनूमहोदयः दर्शयति। यथा शुभमुहूर्तादिकं चिन्तयित्वा वास्तुपूजनं कृत्वा गृहप्रवेशः करणीयः। अतो निष्कर्शर्षरूपेण वक्तुमिदं शक्यते यद्।

बउरीमहाराणाविरचितं शिल्पशास्त्रम् इति ग्रन्थस्य उडीया–पाठः प्रणीतः। अस्मिन् ग्रन्थे पञ्चाध्यायाः सन्ति। प्रथमेध्याये भूमिपरीक्षणं, भूलक्षणं, गन्धानुसारेण भूपरीक्षणं, दीपस्थापन–द्वारा भूपरीक्षा, नक्षत्रशुद्धिः, तिलवपनविधिः, वास्तुकर्मणि निषिद्धाः, षोडशवास्तुभूमि, चैत्रादिमासफलम्, तिथिशुद्धिः, वारनक्षत्रफलम्, ताराबलम्, चन्द्रशुभस्थानविचारः इत्यादि विषयाणां वर्णनमस्ति।

द्वितीयेध्याये गृहनिर्माणार्थम् आयविचारः, तस्योपयोगाः शुभाशुभफलसहितं दर्शिताः। तदनन्तरम् नक्षत्रानयनम्, गृहायुज्ञानम्, गृहायु–पूर्त्तौ पृथव्यादितत्त्वज्ञानम्, राश्यानयनम्, मानप्रमाणम्, वास्तुनागविचारः, तालज्ञानम्, शुभाशुभफलसहितं वर्णित वर्तते। अस्मिन् ग्रन्थे तृतीयेध्याये सूत्रलक्षणम्, गृहारम्भकालेऽथ च सूत्रपातकाले निमित्तानां शुभाशुभशकुनलक्षणानि दर्शितानि। चतुर्थेऽध्याये मङ्गलारोपणविधिः, शल्यविचारः शुभाशुभफलसहितम्, गृहवृद्धिः, प्लवनिर्णयः गृहसमीपस्थ शुभाशुभवृक्षविचारः, तथा गृहे जलभरणफलनिर्णयः प्रस्तुतोऽस्ति। शिल्पशास्त्रमिति ग्रन्थस्य अन्तिमे पञ्चमेऽध्याये गृहप्रवेशविधानम्, विशेषरूपेण ग्रन्थस्य उडीयापाठः, शिल्पीलक्षणम् वर्णितं दृश्यते। अनन्तरं विश्वकर्मोक्तं–गृहप्रवेशविचारो विवेचितो दृश्यते। अयं ग्रन्थः लघुग्रन्थोऽस्ति तथापि वास्तुकर्मणि शिल्पीवर्गाणां कृते ग्रन्थोऽयमतीव महत्त्वपूर्णमिति वस्तुं शक्यते।

***

**डॉ० शङ्करनाथतिवारी**
अगरतला

# वैदिकसाहित्ये केचन आलङ्कारिकप्रयोगाः

वयं सर्वे जानीमः यद् वैदिकसाहित्येन सह लौकिककाव्यशास्त्रस्य नास्ति कोऽपि साक्षात् सम्बन्धः। काव्यशास्त्रदृष्टया यदा विचारो भवति तदा वयं द्रष्टुं शक्नुमो यद् वेदशास्त्रस्योपदेशः तु प्रभुसम्मित–आदेशवत् शब्दप्रधानयुक्तः। अन्यञ्च लौकिककाव्यस्य ये उपदेशाः सन्ति सर्वे खलु भिन्नरूपात्मका वर्तन्ते। काव्यस्योपदेशाः शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणस्य लोकोत्तरवर्णनानिपुणस्य कान्तासम्मितोपदेशप्रदायका भवन्ति। परन्तु वैदिकवाङ्मयेऽप्यनेकेषु स्थलेषु एतादृशाः प्रयोगा दृश्यन्ते येन ज्ञायते यद् वैदिकसाहित्यमपि काव्यत्वदर्शनाभिलाषी–विदुषां कृते आनन्दप्रदायकमस्ति। भारतीयाः पाश्चात्याश्च सर्वे समालोचकाः सूचयन्ति यत् सम्प्रति एतादृशं किमपि ज्ञानं नास्ति यस्य मूलं वेदेषु न भवेत्। सर्वे विपिश्चदाः स्वीकुर्वन्ति यत् प्राचीनतमो ग्रन्थ ऋग्वेद एव। विश्वसाहित्यस्य रङ्गमञ्चे नास्ति कोऽपि ग्रन्थो यः ऋग्वेदात् पूर्वं। वेदशब्दस्याभिप्रायः तु ज्ञानमेव। अतः संसारस्य सर्वविधं ज्ञानं ज्ञानप्रकारं वा वेदेषु लब्धुं शक्यते। मानवानां ज्ञानविज्ञानानां सूर्योदयः ऋग्वेदकाल एव भवति। सर्वे ऋषयः प्रकृतेरुन्मुक्ते मनोहरे प्राङ्गणे निवसन्ति स्म। समये समये प्रकृतिः स्वकीयकृपाकोपाभ्यां तान् प्रभावयति स्म। तस्मिन्नेव काले प्रकृतिप्रभाविताः ऋषयः प्राकृतिकीं शक्तिं तस्याः कृपार्थे कोपप्रशमनार्थे च एकाग्रमनसा स्तुवन्ति स्म। हृदयगह्वरान् निर्गताः तेषां स्तूतयो भृशं मार्मिक्याः सौन्दर्ययुक्ता मनोहारिण्या आलङ्कारिका रसाप्लाविताश्च भवन्ति स्म। अस्मिन्नेव क्रमे ऋषयोऽनेकत्र ध्वनिगुणरसरीत्यालङ्कारप्रभृतिकाव्यशोभाधा–यकतत्त्वानां माध्यमेन प्रकृतेः स्तुतिं कुर्वन्ति स्म। अस्मिन्नेव प्रसङ्गे कतिपयान्येतादृशान्युदाहरणानि वयं द्रष्टुं शक्नुमो यत्रालङ्काराणां हृदयहारि–प्रयोगो वर्तते। ऋग्वेदस्य प्रथममण्डले उपमालङ्कारस्य शोभा

अनुपमा वर्तते। उपमा तु सर्वालङ्काराणां मूलभूता वर्तते। चित्रमीमांसानामके ग्रन्थे उपामनिरूपणप्रसङ्गे अप्पयदीक्षितेनापि स्वीकृतम्– ''उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्। रञ्जयति काव्याङ्गे नृत्यन्ती तद्विदां चेतः।।'' गहनाध्ययनान्तरं ज्ञायते यद् वैदिकसाहित्येऽपि उपमानुप्रासरूपकव्य–तिरेकातिशयोक्तिसदृशाः केचनालङ्काराः समुपलभ्यन्ते।

सर्वप्रथमं सर्वालङ्काराणां मूलभूता उपमैव भवन्नयनयोरुपहारी–क्रियते। **''सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्।।''**[१]

अर्थात् सरणशीलः सूर्यो देदीप्यमानाम् उषसं तथैवाऽनुधावति अनुसरति वा, यथा मनुष्यः सुन्दरीं युवतिमनुसरति। अत्र ऋषिदृष्टौ सूर्य उपमेयः तस्य मनुष्य उपमानम् एवमेव उषा उपमेया, तस्या युवतिः (योषा) उपमानम् इवार्थको वैदिको 'न' शब्द एवोपमावाचकः शब्दः, अनुधावनमनुसरणं वा साधारणधर्मः। विचार्यता नाम तावद् यदत्रोपमायाः सर्वेषामेवाङ्गानां विद्यमानत्वात् पूर्णोपमा केषां सचेतसां मनो नाहरति? यथा वा–

**''परा हि मे विमन्यवः पतन्ति वस्य इष्टये।**
**वयो न वसतीरुप''**[२]

अस्यामृचि ऋषेः शुनः शेपस्य मन्युरहिता बुद्धयो वसुमते जीवनाय तथैव परापतन्ति, यथा पक्षिणो नीडाय परापतन्ति। अत्राप्युपमेयोपमानभावो हृदयहरः प्रतिभाति। यथा बुद्धय उपमेयाः तासां पक्षिण उपमानम्ः इवार्थको 'न' शब्द एवात्राप्युपमावाचकः शब्दोऽस्ति, परापतनं प्रत्यावर्तनं च साधारणधर्मो दृश्यते। यथा वा–

**''प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।**
**यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।।''**[३]

---

१. ऋग्वेदे १/११५/२
२. तत्रैव १/१६/४
३. तत्रैव १/१५४/२

अस्मिन् मन्त्रे तु श्लेषपुष्टोपमायाः सौन्दर्यं हृदयहरत्वं वा दर्शनीीयतायाः सीमानमेव स्पृशति, हृदयतन्त्र्याश्च ताराणि झङ्करोति।

ऋचो भावोऽस्ति यद् भीम आकृत्यैव भयङ्करः कुचरः कुटिस्तो जीवघातपुरस्सरं चरति यः स कुचरः कुत्सिताचरणशीलः, गिरिष्ठाः पर्वतादिप्रदेशवर्त्तिगह्वरवासी मृगः सिंह एव भीमः शत्रुभयदः कुचर– कुषु सर्वासु भूमिषु (त्रिषु लोकेष्विति भावः) चरति यः स कुचरो सर्वव्यापी, गिरिष्ठाः गिरि, मन्त्ररूपायां वाचि तिष्ठति यः स गिरिष्ठाः (सप्तम्या अलुक्) विष्णुवीर्येण (हेतुना) सर्वैः स्तूयते।

अत्र विष्णुः उपमेयः, मृगः (सिंहः) उपमानम्। सादृश्यार्थको वैदिको 'न' शब्द एवोपमावाचकः शब्दः, तथा स्तुतिविषयता एवोभयोः साधारणधर्मः। भीमत्वं, कुचरत्वं, गिरिष्ठत्वञ्च श्लेषसाहाय्येनोभयधर्माणि सन्ति। यथा वा–

**"रथीव कशयाश्वाँ अभिक्षिपन् आविर्दु तान् कृणुते वर्ष्यां अह"**[४]

**अर्थात्ः–** यथा रथी कशया अश्वान् अभिक्षिपन् प्रेरयन्स्वदूतान् भटान् आविष्कुरुते, तद्वदेव असौ पर्जन्योऽपि मेघान् प्रेरयन् वर्ष्यान् वर्षणशीलान् तान् मेघान् दूतान् एव आविष्कुरुते।

अत्र पर्जन्य उपमेयः, तस्य रथी उपमानम्। एवमेव मेघा उपमेयः, अश्वा उपमानम्। 'इव' शब्द उपमावाचकः, आविष्करणमुभयोः साधारणधर्मः। यथा वा–

**"एषा शुभ्रा न तन्वी विदानोर्ध्वेव स्नातो दृश्ये नो अस्थात्।**
**अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्।।"**[५]

अस्यामृचि तिमिरमपाकृर्वती दिवो दुहिता मनोहारी उषाः स्नातोत्थिता समलङ्कृता युवतिरिव प्राच्यामुदेति। उदीयमानाया उषसो देव्या उपमा स्नातोत्थितया अलङ्कृतया युवत्या सह अतीव मनोहरी भाति। यथा वा–

४. तत्रैव ५/८३/३
५. तत्रैव ५/६१/५

**''इमा उ त्वा पुरुवसोऽभि प्र नोनुवुर्गिरः।**
**गावो वत्सं न धेनवः'' ।।**[६]

ऋषेराशयोऽस्त्यस्यामृचि यद् हे इन्द्र! यथा धेनवो गावो वत्सं प्रमोदयन्ति, तथैव मत्कर्तृका इमाः स्तुतिवाचो भवन्तं प्रमोदयन्तु।

अत्र स्तुतिवाच उपमेयाः, तासां गाव उपमानम् एवमेव इन्द्र उपमेयः, तस्य वत्स उपमानम्; वैदिको 'न' शब्द उपमावाचकः शब्दः, तथा प्रमोदनं साधारणधर्मः। उपमायाः सर्वाङ्गनामत्र सत्त्वात् पूर्णोपमा मोदयति मनीषिणां मनः। यथा वा–

**''अयमु ते समतसि कपोत इव गर्भधिम्।**
**वचस्तच्चिन्न ओहसे।।''**[७]

अस्य भावो यद् यथा कपोतः सत्वरं स्वकपोतीं प्राप्नोति, तथैव इन्द्रोऽपि सत्वरं स्वयज्ञं (स्वयज्ञवेदिम्) प्राप्नोति। अत्रापि उपमानोप– मेयाद्युपमावयवा न कस्यापि तद्विदो निगूढाः।

न केवला उपमा एव लभ्यते वेदेषु, अपि तु मालोपमा[८] अपि दरीदृश्यते–

**''अभ्रातेव पुंस एति प्रतीची गर्तारुरिव सनये धनानाम्।**
**जायेव पत्ये उशतो सुवासाः उषा हस्रेव निरणीते अप्सः।।**[९]

अत्र कस्या एव उषसश्चत्वारि उपमानानि राजन्ते।

अथाहमेकमेतादृशमुदाहरणं प्रस्तौमि यस्मिन् न केवलम् उपमाया एव चाकचिक्यता, अपि तु विरोधाभासस्यापि मनोरमा सत्ता आन्दोलयति तद्विदां चेतः, यथा–

---

६. सामवेदे–पूर्वर्चिके २/६/२
७. तत्रैव २/६/६
८. साहित्यदर्पणे १०/२६ (पूर्वार्द्धे)
९. ऋग्वेदे १/१२/७

**"उत त्वः पश्यन् न ददर्श वाचम्**
**उत त्वः शृण्वन् न शृणोत्येनाम्।**
**उतो त्वस्मै तन्वं विसस्रे**
**जायेव पत्ये उशती सुवासाः।।**[१०]

**अर्थात्–** अनेके जनाः विद्यां पठन्ति, किन्तु तस्या रहस्यं न विदितं भवति; एवमेव अनेके जना वाचो रहस्यं शृण्वन्ति, किन्तु तेषां बुद्धौ तद् रहस्यं स्फुरित नैव। किन्तु केचिदेतादृशो बुद्धिमन्तो भाग्यवन्तो वा सन्ति, येषां समक्षं वाणी स्वीयं सर्वमपि गुप्तरहस्यं तथैव प्रकटीकरोति यथा अलङ्कृता पत्नी पत्युः समक्षं स्वीयं सर्वस्वं समर्पयति।

अत्र वाग् उपमेया, तस्या उपमानमिस्त जाया; 'इव' शब्द एव उपमावाचकः, आत्मसमर्पणमुभयोः साधारणधर्मोऽस्ति।

अत्र उपमानमतीव शृङ्गारप्रेरकमस्ति; किन्त्वस्ति हृद्याऽनवद्याच।

अस्या ऋचः पूर्वभागे (उत त्वः पश्यन् न ददर्श वाचम्, ... शृणोत्येनाम्) विरोधाभासालङ्कारस्यापि महत्सुन्दरम् उदाहरणद्वयं वरीवृत्यते। 'पश्यन्नपि न पश्यति', 'शृण्वन्नपि न शृणोति' इत्यहो कीदृशो मनोहरः विरोधः? एवञ्च परमरहस्यभूता सा वाक्, अत एव दृष्ट्वाप्येनां न द्रष्टुं पारयति कश्चिद्, एवमेव श्रुत्वापि एनां न श्रोतुं प्रभवति कोऽपीति तत्परिहारोऽप्यत्याह्लादकारो मनोरमश्च।

एतदनन्तरं एका एतादृशी ऋक् प्रस्तूयते यस्यामतिशयोक्ति–अनुप्रास–विभावना–विशेषोक्तिनाम्नां चतुर्णामलङ्काराणां मनोहरी सत्ता पाठकानां मनांसि हठादावर्जयति। दृश्यताम्–

**"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।"**[११]

---

१०. तत्रैव १/७१/४
११. तत्रैव १/१६४/२०

अस्य मन्त्रस्य भावोऽस्ति यत् शोभनपक्षवन्तौ सहनिवासिनौ सखायौ द्वौ खगावेकमेव वृक्षमधिश्रयन्तौ स्तः। तयोरन्यतरस्तु वृक्षस्थितं फलं भुङ्क्ते, किन्त्वन्यः फलम् अभुञ्जान एव स्वीयं तेजः प्रकटयतीति।

वस्तुतस्त्वस्मिन् मन्त्रे दर्शनशास्त्रस्य ईश्वर–जीव–प्रकृतिसञ्ज्ञकानां त्रयाणां मूलभूतानां तत्त्वानां प्रतिपादनं रूपकालङ्कारस्य समाश्रयेण कृतमस्ति। यथा हि– ईश्वरः प्रकृतिमाध्यमेन सृष्टिमुत्पादयति, जीवश्च तस्यां तस्यां सृष्टौ स्वकीयकर्मानुसारेण सुखदं दुःखदं वा फलं भुङ्क्ते, किन्त्वीश्वरः प्रकृतिजं फलमभुञ्जान एव सर्वं शास्ति, सर्वं च द्योतयतीति भावः। परन्तु ऋषिणा मन्त्रेऽस्मिन्नीश्वर–जीव प्रकृतीनां वर्णनम्, तेषां नामानि न गृहीत्वा पक्षिद्वयवृक्षानामभिर्विहितमस्ति। अहमाशङ्के यदस्यामृचि केचिद् विद्वांसो रूपकालङ्कारं सम्भाव्य अस्या इत्थम्भूतां व्याख्यां कर्त्तुकामा भवितुं शक्नुवन्ति यत् प्रकृतिरेकविशालवृक्षरूपा विद्यते। ईश्वरजीवावपि पक्षिद्वयरूपौ स्तः; तौ च पक्षिरूपौ ईश्वरजीवौ वृक्षरूपां प्रकृतिमाश्रयेते। तयोरीश्वरजीवयोरन्यतर एको जीवस्तु कर्मानुसारेण सुखं दुःखं वा अश्नाति; किन्त्वन्यः पक्षी अर्थाद् ईश्वरस्तु फलमभुञ्जान एव सर्वतः स्वीयं सौन्दर्यं तेजो वा वितनोतितराम्। किन्तु मह्यं त्वत्र अतिशयोक्तिरेव रोचते, न तु रूपकम्। यतो हि मम मतेन रूपक–अतिशयोक्तिभेदिका संस्फुटा रेखा उपमेयस्य सत्ता असत्ता एव वर्तते, न त्वभेदप्रतीतिः। यतो हि सा तूभयत्र लभ्याऽस्ति। मामकोऽयं भावः अस्ति यद् यत्रोपमेयं शब्दोपात्तं भवेत् तत्र रूपकमेव, न त्वतिशयोक्तिः, यत्र च उपमेयं शब्दोपात्तं न भवेत्, अर्थात् तस्य दर्शनमेव न भवेत् केवलम् उपमानमेव शब्दोपात्तं स्यात्, तत्रातिशयोक्तिरेव ज्ञातव्या।

इत्थमहम अवलोकयामि यदस्यामेकस्यामेव ऋचि काव्यस्य भूयांसि तत्त्वानि विलसन्ति, यानि सहृदयहृदयप्रीणनाय सर्वथालं सन्तीत्यत्र न केषामपि धीजुषां विसंवादः सम्भवति। एवमेव अन्या अपीदृश्योऽनेका ऋचो वर्तन्ते यासु सुधियां काव्यतत्त्वावलोकनाभिलाषः पूर्तिमेति। अत्र तासु कतिपया प्रस्तूयन्तेऽपि। यथा–

**''चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्या आविवेश।।**[१२]

स्पष्टम् अस्ति यदस्यामृचि व्यतिरेकातिशयोक्तिनामानावु– भावलङ्कारौ राजेतेतराम्। अस्मिन् मन्त्रे वैयाकरणानां ब्रह्मसहोदरस्योप– मेयभूतस्य वर्ण्यस्य अर्थाद् विषयस्य 'शब्दस्य' अध्यवसानं निगरणं विलीनीकरणं वा एकेनोपमानभूतेन विषयिणा महता वृषभेण कृतमस्ति। उपमेयं नात्र शब्दोक्तम्, अतोऽत्रातिशयोक्तिर् निर्वाधैव राजते।

यदि च शृङ्गचतुष्टयवान् त्रिपात् सप्तहस्तयुक्तः शिरोद्वयसमेतः त्रिधाबद्धोऽयं वृषभः शृङ्गद्वयवतः चतुष्पदेकशिरोवत एकत्र बद्धस्य च लौकिकस्य वृषभस्य अपेक्षया विलक्षणो मन्येत, तदा तु व्यतिरेकालङ्कारम् अत्र को नाम वारयितुमीष्टे? एवमेव–

**'द्वादशारं नहि तज्जराय वर्वति चक्रं परि द्यामृतस्य**[१३]

इत्यत्रापि द्वादशारम् ऋतचक्रमन्यलौकिकचक्रापेक्षया विलक्षणं सद् व्यतिरेकालङ्कारद्योतनाय कल्पतेतराम्। उदात्तसम्पद्वर्णरूपस्य उदातालङ्कारस्योत्कृष्टमुदाहरणमपि **''लोकातिशयसम्पत्तिवर्णनोदात्त– मुच्यते...चरितं भवेत्''**[१४] अथर्ववेदे तत्र लभ्यते, यत्र ऋषिणा भारतभूमेः स्वरूपं वैभवं महत्त्वञ्च समुपवर्णितानि सन्ति।[१५] इदं स्थलमतीव हृदयहरं तथा देशभक्तिबीजाङ्कुरपोषकं विद्यते। एवमेव क्रियादीपकालङ्कारोऽपि **(वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः**[१६] तत्र द्रष्टुं शक्यते। परमेषोऽस्ति अपरिपक्वरूपेणैव।

वर्णानुप्रासप्रियता च वैदिकेषु ऋषिषु बाहुल्येन दृश्यते। लौकिक– काव्यकाराणाम् अनुप्रासालङ्कारस्य (''वर्णसाम्यमनुप्रासः'' मम्मटः

१२. तत्रैव ४/५८/३
१३. तत्रैव १/१६४/११
१४. साहित्यदर्पणे १०/८४
१५. अथर्ववेदे १२/१/३–१०
१६. कुवलयानन्दे पूर्वार्द्धे–४८

काव्यप्रकाशे तथा **"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"**[१७] प्राणवती तनुस्तत्र नितरां परिस्फुटन्ती परिलक्ष्यते। तथाहि–

**(क) रक्षाणो अग्ने तव रक्षणेभो रारक्षाणः सुमख प्रीणानः।**

**प्रतिस्फुर वि रुज बीड्वंहो जहि रक्षो महि चिद् वावृधानम्।।**[१८]

**(ख) हंसः शुचिषद् वसुरन्तरिक्षसद् होता वेदिषद् अतिथिर्दुरोणसत्। नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतम्।।**[१९]

**(ग) धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः।**

**देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्।।**[२०]

**(घ) वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः।**

**देवा गातुविदो गातुं वित्त्वा गातुमित..............।।**[२१]

**(ङ) पर्वते हर्यतो हरि रति ह्वरांसि रंह्या।**[२२]

**(च) इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै।**[२३]

**(छ) पलालानुपलालौ शर्कु कोकं मलिम्लुचं पलीजक्रम्।**[२४]

**(ज) ओजश्च तेजश्च सहश्च बलं च वाक् चेन्द्रियं च श्रीश्च धर्मश्च।**

**ब्रह्म च क्षत्रं च राष्ट्रं च विशश्च त्विषश्च यशश्च वर्च श्च द्रविणं च।।**[२५]

---

१७. साहित्यदर्पणे पूर्वार्द्धे १०/३
१८. ऋग्वेदे ४/३/१४
१९. तत्रैव ४/४०/५
२०. यजुर्वेदे १/८
२१. तत्रैव २/२१
२२. सामवेदे उत्तरार्चिके २/६/४
२३. अथर्ववेदे ६/८८/१
२४. तत्रैव ८/६/२
२५. तत्रैव १२/५/८–१०

एतावता गवेषणात्मकेन विश्लेषणेन मन्ये यद् वैदिक– वाङ्मयेऽपि काव्यालङ्काराः सन्ति। किन्तु मदीयस्यास्य कथनस्येदं तात्पर्यं नास्ति यत्तत्रापि लौकिकसाहित्ये इवैवानेकविधाः कविकल्पनाकान्तिकलितकलेवरा अलङ्काराः सन्तीति। यतो हि वैदिक–वाङ्मयकालिका ऋषयो निजाध्यात्मविषयकाभावाभिव्यक्तये यथा प्रयासं चक्रुः, न तथा स्वमानसकोमलकान्तकामकल्पनाकलाकौशलकीर्त्तये। अतएव तेषां कृतिषु भावानामतिसारल्येन अभिव्यक्तिकरणाय सहजरूपेण प्रयोगविषयीविधीयमाना उपमा–रूपक–व्यतिरेकातिशयोक्तिसदृशा अङ्गुलिगण्याः केचनैवालंकाराः समुपलभ्यन्ते न तु सर्वविधाः। एतेषामप्युपलभ्यमानानामलङ्काराणां तत्र यत्र कुत्रचिदेव प्रयोगो नयनावनिमवतरति, न तु बहुत्र; यतो हि तत्र भूयिष्ठस्तु अंशो निरलङ्कार एवास्ति। अनुप्रासस्तु ध्वन्यात्मकताधायकत्वात् समेषामेव पुरातनानां नूतनानां च लेखकानामतिसहजोऽलङ्कारबन्धः। अतो नेदं विस्मयावहं यद्येष बाहुल्येन लभ्यते वेदेषु। आम्, इदन्त्वहं मनोबुद्धिभ्यामुभाभ्यामेवोररीकरोमि यत् क्वचित् क्वचिद् उपामारूपकयोः प्रयोगः लौकिककविकृता एतदीयाः प्रयोगा इवैवातीव रमणीयाः सन्ति, येषां कानिचिन्निदर्शनान्यस्मिन्नेव लेखे उपरिष्टान् मयोद्धृतेषूदाहरणेषु द्रष्टुमपि शक्यन्ते।

***

**पद्मश्री प्रो० बृजेशकुमारशुक्लः**
लखनऊ

## श्रीहरिकृष्णाऽवस्थिषष्टिः

श्रीगणेशं नमस्कृत्य कच्छपीधारिणीं शुभाम्।
अवस्थीहरिकृष्णानां श्रीमतां वृत्तमुच्यते।।१।।

भारतस्योत्तरे भागे प्रदेश उत्तरः स्थितः।
नीवृति 'हरदोई' च तस्मिन्नस्ति वृहत्तरा।।२।।

'पिहानी' ति प्रसिद्धस्तु तत्र ग्रामोऽस्ति सुन्दरः।
तस्मिन् ग्रामे वसन् कश्चिदवस्थीवंशजो महान्।।३।।

श्रीभगवत्प्रसादाख्य आसीत्स ब्राह्मणोत्तमः।
धर्मभार्याऽभवत्तस्य 'रमा' नाम्नी रमेव सा।।४।।

भजतोर्हरिवृत्तं हि ध्यायतोः कृष्णमेव च।
प्रसादाद् भगवतो वै जातो बालः सुशोभनः।।५।।

वेदाश्वखेटपृथिवीमितविक्रमाब्दे (१९७४ वि०)
चाषाढशुक्लतिथिभे गुरुपूर्णिमायाम्।।
अश्वावनीनिधिधरामित (१९१७ ई०) खिष्टवर्षे
मन्ये बृहस्पतिसमो गुरुरेव जातः।।६।।

गौराङ्गपुष्टवदनः किलकारिशब्दैः
सर्वाञ्जनान् प्रमुदितानकरोद् बालः।
दिव्यं वपुः समवलोक्य पिता च माता
जातौ प्रसन्नमनसौ वदतः स्म धन्यम्।।७।।

भूयात्स विष्णुरिव विक्रमदानशीलः
लीलाललाम–तरुसिञ्चनकर्मकृष्णः।
एतद् विचार्य सुबुधाः खलु यस्य नाम
मातुः पितुश्च शुभदं हरिकृष्णमाहुः।।८।।

क्वचित्सङ्क्रीड्य बालैः सह क्वचिदव्यक्तमगायत्।।
खेलानकानि सङ्गृह्य क्रीडयित्वा मुहुर्मुहुः।।९।।

क्रीडासु यस्य बलतां मतितां न जग्मुः
सर्वे व्यस्कशिशवोऽपि बलिष्ठबालाः।
संवीक्ष्य सर्वपरिवारजनाः प्रसेदु–र्वाल्येऽपि
यस्य गतिरुत्तमतामगच्छत्।।१०।।

व्यायामेन तु पुष्टाङ्गः शैशवञ्च शनैः शनैः।
तत्याज स विशालाङ्गः क्रमशो यौवनं ययौ।।११।।

एवं गृहे जनकपोषितमातृपालो
बालो बभूव तरुणः शतमल्लमल्लः।।
लम्बायतश्च वपुषा नयनाभिरामः
वक्षःस्थलोऽतिरमणो रमणो जनेषु।।१२।।

यौवने सुन्दरश्चासीद् हरिः साक्षान्न संशयः।
कृष्णो वाऽभवदसौ तु गो–गोपबल्लभः सदा।।१३।।

छविना मन्मथश्चासीत् किन्तु कामः पराजितः।
क्रोधेन शङ्करश्चासीत् किन्तु हिंसाविवर्जितः।।१४।।

प्रारम्भिकीमवाप्याऽसौ शिक्षां पितृमुखेन च।
ववृधे स यथा यथा शिक्षा वृद्धिङ्गता तथा।।१५।।

अप्रयासेन मध्यमामसौ शिक्षामतीतरत्।
लक्ष्मणं नगरं प्राप्य सोच्चशिक्षामचीकमत्।।१६।।

नासीच्च कोऽपि सदृशो बलतासमेतः
नासीच्च कोऽपि सदृशो विभुतासमेतः।
नासीच्च मल्लसमरे खलु कोऽपि मल्लो
यस्तस्य बाहुबलधर्षणतां न यातः।।१७।।

छात्रजीवनतः सोऽभूद् राजनीतिपरो महान्।
परास्नातको हिन्द्या चान्येषु विषयेषु हि।।१८।।

पारङ्गतो बभूव स शेषो वाऽपि बृहस्पतिः।।
नित्यं यस्यानने रम्या वसति स्म सरस्वती।।१९।।

शोधोपाधिमवाप्याऽयं हिन्दीसाहित्यवल्लभः।
यन्मानसं सदा रेमे रामचरितमानसे।।२०।।

तुलसीदासकृतं यत्तु रामरितमानसम्।
सम्पूर्णमस्मरद् विद्वान् गायं गायं ननन्द ह।।२१।।

यस्योर्दू दासतां याता चुम्बत्याङ्ग्ला मुखाम्बुजम्।
भाषाविज्ञानके चाऽपि यस्य प्रज्ञा व्यजृम्भत।।२२।।

संस्कृतभाषया रम्यं शुशुभे यस्य वराननम्।
रघुवंशादिकाव्यानि जिह्वाङ्गणे विरेजिरे।।२३।।

प्रवक्तृपदमारभ्य चाचार्यपदमाप्य च।
विश्वविद्यालये त्वस्मिंल्लक्ष्मणपुरपत्तने।।२४।।

हिन्दीविभागमुख्यञ्च पदं तत्र दधार ह।
लक्ष्मणपुरवास्तव्यः सोऽभूद् राजर्षिसत्तमः।।२५।।

'उमा' नाम्नी तु या भार्या दान—धर्मपरायणा।
साध्वी पतिव्रता साक्षाच्च गौरीव शुचिस्मिता।।२६।।

उमया भार्यया युक्तः कथं नाऽऽसीदुमापतिः।
विद्वान् पराक्रमी शूरो रेजे स शङ्कर इव।।२७।।

तिस्रः कन्यास्त्रयः पुत्राः सर्वाः सर्वे सुशिक्षिताः।
अस्य सन्ततयो रम्या वैभवेन च चुम्बिताः।।२८।।

एवं परिच्छदं प्राप्य रेजेऽवस्थीगृहे मुदा।
लक्ष्मीः सरस्वती चोभे रेजाते भवने शुभे।।२९।।

हिन्दी–सेवां प्रकुर्वाणः प्रदेशोत्तरराज्यके।
विधानपारिषद्योऽभूत्स्नातकक्षेत्रमण्डले।।३०।।

वारं वारं पदं लेभे निर्वाचनं मुहुर्मुहुः।
शास्त्रवह्निमितेभ्यस्तु वर्षेभ्यश्चाऽधिकं ननु।।३१।।

कालं निनाय राजर्षिर्लोकसेवां चकार सः।
प्रतापी सर्वधर्मज्ञो जमदग्नसुतो यथा।।३२।।

अवस्थी हरिकृष्णश्च नाम्ना स प्रथितोऽभवत्।
पण्डितोऽपरनामा स ह्यवस्थीत्यपि गीयते।।३३।।

न दलपरिबद्धोऽभून्नैच्छन्मन्त्रिपदं तथा।
निरपेक्षेण भावेन जनसेवाव्रतं दधौ।।३४।।

दीनोद्धरणसङ्कल्पो न विकल्पपरोऽभवत्।
सुधियां द्विज–मुख्यानां समुद्धर्त्ता न संशयः।।३५।।

वृद्धानां गुरुजनानाञ्च सम्मानं चकार वै।
दुर्जनानां च संहर्त्ता सोऽभवद् राघवो यथा।।३६।।

नेतारश्च विनेतारश्चानेके मन्त्रिणो वराः।
मुख्यमन्त्रिण आगत्य प्रणेमुर्यत्पदाम्बुजम्।।३७।।

राज्यपालादयः सर्वे ह्युच्चाधिकारिणस्तथा।
यस्याङ्घ्रिप्रणतिं कृत्वा चाऽऽननन्दुर्मुहुर्मुहुः।।३८।।

तेजस्वी च यशस्वी च वर्चस्वी च जनेषु सः।
सर्वलोकप्रियः साधुराशुतोषो न संशयः।।३९।।

विद्वत्त्वञ्च नृपत्वञ्च यत्र द्वयं व्यराजत।
धन्यधन्या भवन्ति स्म सर्वे तदङ्घ्रिसेवनात्।।४०।।

कालान्तरे सकललोकललामभूतः
सोऽवस्थिवंशरमणः पुरि लक्ष्मणायाम्।।

तत्कौलपत्यपदवीं स दधार विश्व–
विद्यालये निजकपावनकर्मभूमौ।।४१।।

मेने स मातृवदलौकिकभूतसंस्थां
सेवां चकार मनसा वपुषा वचोभिः।।
संस्था प्रकाशितवती त्वयि कौलपत्ये
लोकैरभाणि वचनं रसनाभिरामम्।।४२।।

श्रेष्ठस्त्वरिथकुलजो 'हरिकृष्ण' नामा
कीर्त्त्या महेन्दुसदृशः प्रबलो विपश्चित्।।
रेजे पदञ्च विपुलं त्विह कौलपत्य–
मेतादृशः कुलपतिर्नहि भूतभावी।।४३।।

विद्याकल्पतरूर्विधानपरिषद्वाटीषु यः पुष्पितः।
ज्ञानालङ्कृतकौलपत्यफलदोऽभूद् विश्वविद्यालये।।
कामं कामफलं त्वलम्भि सुबुधैस्तत्पारिजाताश्रितै–
र्वन्दे श्रीहरिकृष्णपादयुगलं बोधाब्धि–पङ्केरुहम्।।४४।।

हिन्दीसंस्कृतसंस्कृताऽऽङ्ग्लसुवचो वक्त्राम्बुजे राजते।
उर्दूभाषणतत्परश्च तुलसीसाहित्यवारांनिधिः।।
नीरक्षीर–विवेचने खलु हता हंसा भवत्प्रज्ञया।
चेतो मे भ्रमरायते तव पदाम्भोजे त्ववस्थीयते।।४५।।

येन लब्धं यशश्चन्द्रिकेवोज्ज्वलं
हिन्दिभाषाविकासार्णवा जृम्भणे।
दीनलोकान् समुद्धर्तुकामो ह्ययं
सर्वकारे समायोजनाः नीतवान्।।४६।।

मुश्लिमा हिन्दु–ख्रिस्ताश्च ये सज्जना
यस्य गाथां जगुर्यस्य कीर्त्तिं जगुः।
राजनेतार आगत्य पादस्पृशो
यस्य चाऽऽशीस्तु सम्प्राप्य तृप्ता न के।।४७।।

दीनतानाशने पारिजातद्रुमो
वीरतादर्शने जामदग्न्यो यथा।
मित्रता–साधने यः स्वयं मारुतिः
कृष्णपूर्वो हरिर्गीयते सोऽधुना।।४८।।

विप्रो ज्ञानधनार्जने नृपनये शौर्ये च यः क्षत्रियः।
दानोदारतया वशीकृतविशश्चेत्थं द्विजत्वं तव।।
विद्वन्मूर्धनिबिद्धपुष्पवलयालीनिर्झरद्रेणुभिः
पादौ श्रीहरिकृष्णपण्डितवराणां रञ्जितावाश्रये।।४६।।

येनाऽधारि तु कौलपत्यपदवी सौमित्रपुर्यां मुदा
येनाऽलम्भि च हिन्दिभाषितबलात्कीर्त्तिर्मरालोपमा।।
येनाकारि सुकाव्य–कर्तृतुलसीदासानुशीलेक्षणम्।
येनाऽभाषि विभाषणं सुललितं संसत्सभामण्डपे।।५०।।

येनाऽवर्द्धि तु विप्रवंशविभवो दीनातपत्रश्च यो
येनाऽपाठि सुराजनीतिविषयः सर्वान् हि नेतॄन् सदा।।
येनाऽदर्शि सदाचरोऽनुचरता सत्यं शिवं सुन्दरम्
तस्मै श्रीहरिकृष्णपादगुरवे तेजस्विने वै नमः।।५१।।

अरुणाननलोकविमुग्धकरः
करुणानयनो हित–भावभरः
बलदारुणदेहविभीतपरः
परमो हरिकृष्णगुरुर्जयतात्।।५२।।

तुलसीकवितावनितारमणो
जितकोविदबुद्धिसरोवदनः।।
कृतराजधनाञ्चितदीनजनः
परमो हरिकृष्णगुरुर्जयतात्।।५२।।

द्विजलोकहितङ्करबुद्धिधरो
नयदर्शितवर्त्मनि पादचरः।
समलङ्कृतकीर्त्तिसमुद्रतरः
परमो हरिकृष्णगुरुर्जयतात्।।५४।।

एवं श्रीहरिकृष्णोऽभूत्सर्वसम्पत्समन्वितः।
पुत्रपौत्रान्वितो लेभे ह्यशेषं लोकजं सुखम्।।५५।।

राजश्रियं धनश्रियञ्च विद्याश्रियं तथैव च।
लब्ध्वा भुङ्क्ते स्म सुखं यत्तु मानुषेऽस्ति दुर्लभम्।।५६।।

येन भुक्ताश्च भोगा अनेके विधाः
येन प्राप्ताः सुखं शर्म लोकश्रियः।
वाहनं हर्म्य–शय्यासनं साधनं
यस्य सेवां प्रचक्रुश्च तस्मै नमः।।५७।।

आजानुबाहुरमणो रमणोऽखिलानां
पाथोजवक्त्रनयनो नयनो बुधानाम्।।
लम्बायतं सुवपुराधृतवानसौ यो
वृद्धां दशां न गतवानपि वृद्धभूतः।।५८।।

संसारकालकलितो न हि कोऽपि शेषः
एवं विधो भगवतो नियमोऽस्ति लोके।
सोऽवस्थिवंशतपनः समयानुसारं
चित्तं निधाय परमात्मनि संस्थितोऽभूत्।।५९।।

रोगेण पीडिततनुर्न बभूव वृद्धो
नाऽभूदसौ विकल–चित्तपराश्रितो वा।।
किञ्चिच्छरीरपरिधौ समभूद् विचक्रं
वैद्या न शान्तिकरणे त्वभवन् समर्थाः।।६०।।

अश्वेषु शून्यनयने (२०५७) मितविक्रमाब्दे
माघे सिते हरिणलाञ्छनपूर्णतिथ्याम्।
शीतांशुशून्यवियदम्बक ईशुवर्षे (२००६ ई०)
मासोत्तमाफरवरीहरितारिकायाम्।।६१।।

इत्थं समागतवती चिरशान्तिवेला
वेलाविजृम्भणपरा जलधिर्यथाऽसौ।
चन्द्रं चुचुम्ब किमु सूर्यविपाटनेन
लेभे स मोक्षपदवीं खलु पूर्णिमायाम्।।६२।।

अहो ध्यायं ध्यायं सुरभि हरिकृष्णाङ्घ्रिकमलम्।
ततः पायं पायं सुचरितसुधाधारमनिशम्।।
यशो गायं गायं कुमुदधवलं ते जनततम्।
अहं जातो धन्यो मम रचितधन्योरुकविता।।६३।।

मनो मल्लीव फुल्लतु यशोमीरो विजृम्भताम्।।
गायतो हरिवृत्तं मे वर्धतां श्रीमतल्लिका।।६४।।

।। इति प्रो० बृजेशकुमारशुक्लप्रणीता
श्रीहरिकृष्णाऽवस्थिषष्टिः सम्पूर्णा।।

***

**डॉ० पि.टि.जि.वै. सम्पत्कुमाराचार्यः**
तिरुपतिः

# पाञ्चरात्रश्रीवैहायसीसंहिता

भगवतोऽर्चामूर्तेराराधनपद्धतिनिरूपकं शास्त्रम् आगमशास्त्रम्। तच्च त्रिधा वर्तते, शैव–शाक्त–वैष्णवभेदेन। शैवागमेषु शिवः परमो देव इति, शाक्तागमेषु शक्तिः परमदेवतेति, वैष्णवागमेषु विष्णुः परमात्मेति च प्रतिपाद्य तत्तद्देवतानामनुग्रहकारकं षोडशोपचारैः पूजनं तत्र तत्र निरूप्यते। यद्यपि निगमापरपर्याय आगमशब्दः तथापि प्रतिमार्चनप्रकारनिरूपकशास्त्रत्वेन प्रथामाप। वैष्णवागमाश्च पाञ्चरात्र–वैखानसभेदेन द्विधा वर्तते। यथा श्रुतिः भगवता प्रवर्तितः, तथा पाञ्चरात्रमपि भगवता नारायणेनैव स्वयं प्रोक्तमिति शास्त्रस्यास्य वैशिष्ट्यं संलक्ष्यते। महाभारते पाञ्चरात्रविधानेन भगवदर्चनं प्रशस्तमिति न्यरूपि। पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति साक्षात् भगवन्मुखारविन्दात् निस्सृतमिदं शास्त्रं मुमुक्षूणामत्यन्तोपकारं राराजते।

अनादिकालात् स्वकर्मपरिपाकाय जननमरणरूपसंसारचक्रे परिभ्रमतां जीवानां दुःखनिवृत्तये आत्यन्तिकसुखप्राप्तये च परमकारुणिकेन भगवता स्वरूपनिरूपकत्वेन भगवदानन्दानुभवरूप–मोक्षलाभाय च पाञ्चरात्र–शास्त्रमुपदिष्टम्। तन्मार्गानुसारेण ये भगवन्तमाराधयन्ति ते अनित्यमसुखमिमं लोकं त्यक्त्वा नित्यानन्दसुखैकलक्षणं विष्णोः परमपदं प्राप्य भगवन्तमनुभवन्तश्चिरं तिष्ठन्ति। सार्धकोटिश्लोकप्रमाणेन नारायणेन भगवता नारदायोपदिष्टं शास्त्रं पाञ्चरात्रम्। नारदेन च तदा तदा भगवदादेशात् मुमुक्षुभ्य उपदिश्य लोके प्रावर्तितमिदं शास्त्रम्। एवं समयानुसारेण तत्तन्महर्षिभिः आश्रितेभ्य उपदिष्टमिदं शास्स्त्रम् अष्टोत्तरशतसंहितारूपेण प्रसृतं वरीवर्ति। ते च ग्रन्थाः तत्तन्नाम्ना च व्यपदेशलमभन्त। संहिता इति तन्त्रमिति च पाञ्चरात्रग्रन्थाः सङ्कीर्त्यन्ते।

पञ्चसु रात्रिषु भगवता नारायणेन ब्रह्मणे, रुद्राय, इन्द्राय, देवेभ्यो ऋषिभ्यश्च प्रोक्तमिति कृत्वा शास्त्रस्यास्य पाञ्चरात्रमिति नाम प्रसिद्धमभूत्। शास्त्रस्यास्य बहूनि नामानि दृश्यन्ते। भगवता प्रोक्तमिति हेतोर्भागवतं शास्त्रमिति, पञ्चसु रात्रिषु प्रोक्तमिति पाञ्चरात्रमिति, स्वस्य पञ्चायुधांशेभ्यः पञ्चभ्यो ऋषिभ्य उपदेशात् पाञ्चरात्रमिति, पञ्चापि शास्त्राणि एतदभिलक्ष्य रात्रीयन्ते इति कारणात् पाञ्चरात्रमिति एवं रीत्या बहुधा व्यपदिश्यत इदं शास्त्रम्।

**एकायनम्–**सदाख्यपरब्रह्मणो वासुदेवस्य परतत्त्वनिरूपणेन, एकान्तिभिरनुष्ठेयस्य परमात्मनोऽर्चननिरूपणेन च मोक्षमार्गप्रदर्शकं, महतो वेदवृक्षस्य मूलभूतत्वेन कृतयुगे भगवता भूतले प्रवर्तितमिदं प्रथमम्। भगवत्प्राप्तिरूपमुक्तेरेतदतिरिच्य मार्गान्तरं नास्तीत्यतो हेतोरेकायनमिति नाम समभवत् शास्त्रस्यास्य। दिव्य–आर्ष–मुनिभाषितमिति त्रिधा विभागोऽस्ति। रत्नत्रयम्–सात्वत–पौष्कर–जयाख्यसंहिताः प्राचीना इति तद्विवरणरूपेण ईश्वर–पारमेश्वर–लक्ष्मीतन्त्राणि प्रवर्तन्ते इति च प्रथते। ज्ञान–योग–क्रिया–चर्याभेदेन शास्त्रेऽस्मिन् चतुर्धा पादविभागो दरीदृश्यते।

आगमशब्दो यद्यपि निगम–वेद–श्रुतिशब्दानां पर्यायो दृश्यते, तथापि विशेषतो भगवदाराधनादिनिरूपकशास्त्रत्वेन सुप्रथितः। आगमशास्त्रमनादि–भगवतैव स्वयं प्रवर्तितमिति च सम्प्रदायः। वैष्णवागमः पाञ्चरात्र–वैखानसभेदेन द्विधा। पाञ्चारात्रागमस्यैव एकायनवेदः, मूलवेदः, श्रुतिविभावनम्, भगवच्छास्त्रमित्यादीनि नामान्तराणि। पाञ्चरात्रशब्दस्य विंशत्यधिकानि लक्षणानि तत्तत्संहितासु दरीदृश्यन्ते। मुख्यशो दिनं पञ्चधा विभज्य तत्तत्काले भगवदाराधनार्थं क्रियमाणपाञ्चरात्रक्रियाप्रतिपादकं शास्त्रं पाञ्चरात्रमिति प्रतीयते। पाञ्चरात्रशास्त्रे अष्टोत्तरशतसंहिता वरीवर्तन्ते। सार्धकोटिपरिमिताः श्लोकाः आराधनांशान् निरूपयन्ति।

पाञ्चरात्रस्य प्रामाण्यं काश्मीरपण्डितेन जयन्तभट्टेन न्यायमञ्जर्यां, उत्पलवैष्णवेन स्पन्दकारिकायां, भगवद्यामुनाचार्येण आगमप्रामाण्ये, भगवद्रामानुजाचार्येण उत्पत्त्यसम्भवाधिकरणश्रीभाष्ये, वेदान्तदेशिकैः

पाञ्चरात्ररक्षायां च प्रत्यपादि। एवमेव श्रीउत्तमूर् वीरराघवाचार्यैः पाञ्चरात्रपारम्यमिति, श्रीवाधूलवीरराघवाचार्यैः पाञ्चरात्रकण्टकोद्धार इति विशिष्टा ग्रन्थाः पाञ्चरात्रप्रामाण्यप्रकाशकाः सग्रन्थिताः। श्रीमद्भि– र्वेदान्तदेशिकैः पाञ्चरात्रं वैखानसमित्युभयविधमपि आगमशास्त्रं भगवदाराधनाय स्वीक्रियते इति शरणागतिदीपिकायामुक्तम्–

**त्वां पाञ्चरात्रिकनयेन पृथग्विधेन**
**वैखानसेन च पथा नियताधिकाराः।**

**सञ्ज्ञाविशेषनियमेन समर्चयन्तः**
**प्रीत्या नयन्ति फलवन्ति दिनान्यमूनि।। इति।**

श्रीवैहायसीसंहिता पाञ्चरात्रग्रन्थेष्वतिप्राचीनेष्वन्यतमा। अष्टोत्तर– संहितापरिगणने तत्र तत्र कपिञ्जल–पाद्म–सात्त्वतादिषु समुल्लिखिता वरीवर्ति। एता अप्रकाशिताया अस्याः संहितायाः हस्तलिखितप्रतिरेका इदानीं समुपलब्धा। प्रतिरियं ग्रन्थाक्षरेषूपलभ्यते। अस्याः प्रतेः लेखनकालस्य विषये ग्रन्थान्ते लेखकेन श्लोकद्वयमेवं संयोजितमस्ति–

**नारायणनगे क्षेत्रे यतिराजमठे मया।**
**लिखितं ग्रन्थतस्तत्र सावधानेन वर्त्मना।।**

**खाष्टसप्तधरावर्षे यतिराजाज्ञया त्वथ।**
**प्रसन्ना वैष्णवाः सन्तु पाञ्चरात्रपरायणाः।।**[1]

इति। अनेन ज्ञायते यन् मातृकेयं कर्णाटराज्ये माण्ड्यामण्डलान्तर्गत– तिरुनारायणपुराभिधे मोलुकोटैक्षेत्रे यतिराजमठे १७८० तमे वर्षे प्रतिलिपीकृता इति। वैहायसापरनामधेयेन श्रीमता गरुत्मता भगवदाज्ञया भुवि प्रकाशिता इति कारणात् संहितेयं वैहायसीसंहिता इति नाम्ना प्रथिता। भगवतो विष्णोराज्ञया गरुत्मान् श्रीवैकुण्ठाद् भुवमागत्य हिमालयेषु सालग्रामक्षेत्रे तपश्चरतां भरद्वाजादिमुनीनां शास्त्रमिममुपदिदेश इति शास्त्रारम्भे प्रथमाध्याये दरीदृश्यते।

१. वैहायसीसंहितायाम्–ग्रन्थान्ते प्रोक्तं श्लोकद्वयम्।

ग्रन्थेऽस्मिन् अध्यायाः अवतारनाम्ना समुल्लिखिताः। आहत्य द्वाविंशत्यवतारेषु पञ्चशत्रिंशदुत्तरशताधिकद्विसहस्रं श्लोकाः (२१३५) अस्यां प्रतौ समुपलभ्यन्ते। अत्रत्याः केचन श्लोकाः इतरसंहितास्वपि दृश्यन्ते यथा–

**संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः।**[२]

इति श्लोकः अहिर्बुध्न्यसंहितायां[३] दृश्यते।

मुख्यत आलयनिर्माणं, विग्रहप्रतिष्ठापूजादिकं, उत्सवनिर्वाह इत्यादयो विषया आगमशास्त्रे निरूप्यन्ते। आराधनं स्वार्थयजन–परार्थयजनरूपेण द्विविधम्। गृहार्चनं स्वार्थयजनम्, आलयार्चनं परार्थयजनम्। परार्थयजनं परार्थं राजराष्ट्रहिताय च क्रियते। अष्टोत्तरशतं दिव्यक्षेत्राणि स्वयंव्यक्तानि परिगणितानि। तेष्वपि दक्षिणदेशे चत्वारि क्षेत्राणि अतिप्रमुखानि। तिरुमलै–काञ्चीपुरम्–श्रीरङ्गम्–तिरुनारायणपुरमिति। तेषु तिरुमलक्षेत्रे वैखानसप्रक्रियया, अवशिष्टेषु पाञ्चरात्रप्रक्रियया चार्चनादिकं निरूह्यते। पाञ्चरात्रे सात्त्वत–पौष्कर–जयाख्यसंहिताः रत्नत्रयशब्देन प्रथन्ते। तास्त्रयः त्रिषु क्षेत्रेषु अवलम्ब्यन्त इति पारमेश्वरसंहिता प्रमाणयति–

**एतत्तन्त्रत्रयोक्तेन वर्त्मना यादवाचले।**
**श्रीरङ्गे हस्तिशैले च क्रमात् संपूज्यते हरिः।।**इति।

पाञ्चरात्रशास्त्रं बहुविस्तरशः सार्धकोटिश्लोकमितेन भगवता नारायणेनैव उपदिष्टमिति तत्र तत्र पाञ्चरात्रसंहिताभ्यो महाभारतादपि चावगम्यते।

**पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्।**
**वेदान्तेषु यथासारमुद्धृत्य भगवान् हरिः।**
**भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथासुखम्।।**[४]

सात्त्वतादितत्तत्संहितासु अष्टोत्तरशतपाञ्चरात्रसंहितापरिगणनमुपलभ्यते। तथापि तत्तत्संहितानिर्दिष्टविभिन्ननामसङ्ग्रहणेन आहत्य २२५

---

२. तत्रैव २१–१००

३. अहिर्बुध्न्यसंहितायाम् ३२–१५

४. महाभारते ३५१.६८–६६

संहितानामानि आधुनिकसंशोधकैः समुल्लिख्यन्ते।

एताः संहिताः दिव्य–मुनिभाषित–मानुषभेदेन त्रिधा विभज्यन्ते। सात्त्वत–पौष्कर–जयाख्यादयः साक्षाद् भगवता नारायणेन प्रोक्ता दिव्यसंहिता इति व्यवह्रियन्ते। नारायणाल्लब्ध्वा महर्षिभिर्लोके प्रवर्तिताः संहिता मुनिभाषिता मन्यन्ते। महर्षिभिर्लब्धा मुनिभिः प्रवर्तिता मानुषा इति विभज्यन्ते। तेषु वैहायसीसंहिताऽपि दिव्ससंहितासु अन्तर्भवति। संहितानां कालनिर्णयो न तावान् सुलभः। यतो हि तत्तत्संहितासु कापिञ्जलादिष्वन्येषां संहितानां परिगणनमस्ति। कपिञ्जलसंहितायां शतं संहिताग्रन्थाः उट्टङ्किताः। पुरुषोत्तमसंहितायां षडुत्तरशतं, भरद्वाजसंहितायां शतं ग्रन्थानां उल्लेखो भिन्नक्रमे वर्तते। सम्प्रदायानुगुणं ग्रन्थोल्लेखानुगुणञ्च दृष्ट्वा इयं वैहायसीसंहिता अतिप्राचीना इति वक्तुं शक्यते। संहितेयं भगवता गरुत्मता त्रेतायुगे हिमालयेषु तपस्तपतां भरद्वाजादीनां महर्षीणामुपदिष्टेतित्युल्लिख्यते। संहितायामस्यां पूर्वतनानां कासाञ्चित् संहितानां नामानि उट्टङ्कितानि। कृतयुगे भगवता नारायणेन निःश्रेयससाधनत्वेनोपदिष्टः पाञ्चरात्राभिध–मूलवेदः एकायनवेदः त्रेतायुगे मुमुक्षुभिर्न लभ्यत इति हेतोः पुनः प्रसाराय श्रीवैकुण्ठाद् गरुत्मान् भुवि प्रेषित इति प्रथमेऽध्याये शास्त्रावतारे समुपवर्ण्यते।

भारद्वाजादिमुनीनां प्रस्तावः श्रीमद्रामायणेऽपि वर्तत इति तेभ्य उपदिष्टेयं संहिता त्रेतायुगकालीनेति वक्तुं शक्यते। एवमेव नारदीयसंहिता सङ्कर्षणकाण्डापरनाम्नी प्रथमेति, काण्वशाखाभिदा कण्वसंहिता द्वितीयेति, शाण्डिल्यसंहिता तृतीयेति, वैहायसीसंहिता चतुर्थेति चात्र क्रमः प्रदर्श्यते।

लक्ष्मीतन्त्र–पाद्म–कपिञ्जल–पुरुषोत्तम–विष्णुतत्त्वादिसंहितासु परिगणितासु पाञ्चरात्रग्रन्थेषु वैहायसीसंहिताया अपि उल्लेखोऽस्ति। आगम–मन्त्र–तन्त्र–तन्त्रान्तरसिद्धान्तभेदेन चतुर्विधे ह्यागमशास्त्रे मन्त्रसिद्धान्त–प्रतिपादनपरोऽयं ग्रन्थो वैहायसीसंहिता।[५] काश्मीरपण्डित उत्पलाचार्यः (9th C.AD.) स्वीये स्पन्दप्रदीपिकाग्रन्थे[६] वैहायसीसंहितायाः

५. मन्त्रसिद्धान्तरूपेण प्रथितं जगतीतले। (वैहायसीसंहितायाम् ३–२)

६. स्पन्दप्रदीपिकायाम् पृ. ३३

काश्चन श्लोकानुद्धधार।[७] आधुनिकचारित्रकाणां मते संहितेयं चतुर्थशतका–दानन्तरिका नवमशतकात् प्राचीना इति निश्चीयते। ग्रन्थेऽस्मिन् पौष्कारसंहितायाः, तथा महातन्त्रस्य चोल्लेखो दृश्यत इति हेतोर्ग्रन्थस्यास्य तदानन्तर्यं प्रतीयते। मानसयागः पौष्करसंहितोक्तप्रकारेण कर्तव्य इति तृतीयेऽध्याये[८], एवं शिष्यलक्षणानि महातन्त्रोक्तानि[९] अत्रापि सङ्ग्राह्यानीति सप्तदशेऽध्याये च प्रतिपादितमस्ति। तथैव पञ्चदशेऽध्याये अध्ययनोत्सवनिरूपणम् अपरासु वैष्णवागमसंहितासु समाहात्म्यमुपवर्णितमिति उल्लिख्यते[१०]। ताश्च संहिता एवं भवेयुः।

वैहायसीसंहितायां द्वाविंशतिरध्याया वर्तन्ते। प्रथमोध्यायः शास्त्रावताररूपः। पाञ्चरात्रशास्त्राविर्भावः विकासश्चात्र वर्णितः। वैहायसीसंहिताया उत्पत्तिप्रकार एवं कथ्यते। वैहायसो नाम गरुत्मान्। तेन प्रकाशितेयं संहिता तन्नाम्ना प्रसिद्धिं गता। इयं संहिता श्रीवैकुण्ठवर्णनेन समारभ्यते। श्रीमति वैकुण्ठे दिव्यलोके गरुत्मान् नारायणमेवं पृच्छति भगवन्! बहवोऽवतारा भवता गृहीताः। संसारिणां मोक्षावाप्तये बहवो मार्गाश्चोपदिष्टाः। किमर्थं बहोः कालात् न कोऽपि मानवो मुक्तिमेति? इति। तदा नारायणो वदति–'मुमुक्षूणां हिताय मया पाञ्चरात्राभिधं शास्त्रं मदाराधनरूपं लोके कृतयुगे एवोपदिष्टम्। कालान्तरे जनानामश्रद्धया शास्त्रमिदं नष्टप्रायमभवत्। इदानीं तेत्रायुगे भरद्वाजादयो महर्षयो मदनुग्रहाय हिमालयेषु तपश्चरन्तो वर्तन्ते। अतो भवान् भुवं गत्वा मदुक्तप्रकारेण मत्प्रीतिकरं मदाराधनरूपं पाञ्चरात्रशास्त्रं भरद्वाजादिभ्य उपदिशतु' इति। भगवतः श्रीमन्नारायणस्याज्ञां स्वीकृत्य गरुत्मान् इमं शास्त्रं भुवि भरद्वाजादिमहर्षिभ्यो उपदिदेश इति

---

७. विषुवत् कं जयं कुर्यात् नादोर्ध्वध्वनिबोधितम्।
मन्त्राक्षराणि मणिवत् शक्तौ प्रोक्तानि भावयेत्।।
तामेव च परे व्योम्नि परमामृतबृंहितम्।
दर्शयन्त्यात्मसद्भावमेवं मन्त्रो हुतिं विना।। (वैहायसीसंहितायाम् २२.६–६)

८. मूलेन पौष्कारोक्तेन मानसं यागमारभेत् (पौष्करसंहितायाम् ३–४२)

९. वर्णितानि महातन्त्रे सङ्क्षेपादुच्यते मया।। (तत्रैव १७/४६)

१०. अध्ययनोत्सवं वक्ष्ये धनुर्मासे प्रकीर्तितम्।
वैष्णवागमशास्त्रेषु समाहात्म्यं हि वर्णितम्।। (तत्रैव १५/२०२)

शास्त्रारम्भः।

पूर्वमिमं शास्त्रं नारदः सङ्कर्षणालब्ध्वा भुवि प्रकाश्य, नारदपाञ्चरात्रमिति प्रथामवाप। तथैव तोताद्रिशिखरे तपस्तप्त्वा कण्वमहर्षिः शास्त्रमिदमधिगतवान्। तदनु शाण्डिल्यमहर्षिः वासुदेवादिदं शास्त्रं प्राप्य स्वशिष्येभ्यः सुमन्तु–जैमिनि–भृगूपगायन–मौञ्जायनेभ्य उपादिशत्। इदानीमहं भवद्भ्य उपदिशामीति गरुडो भरद्वाजादिभ्यो विवृणोति।

द्वितीयेऽध्याये पञ्चकालक्रियासु अभिगमनमुपादानञ्च निरूप्येते। दिनं पञ्चधा विभज्य तत्तत्काले भगवदाराधनाय क्रियमाणाः क्रियाः पञ्चकालक्रिया इत्यभिधीयन्ते पाञ्चरात्रागमशास्त्रे। ते च पञ्च–अभिगमनम्, उपादानम्, इज्या, स्वाध्यायः, योगश्चेति। अनेन सहार्चनस्य प्रामुख्यं चात्र निरूप्यते। गरुडो नारायणाच्छ्रुतं रहस्यमेवं विवृणोति– 'नारायणार्चनेन सर्वेऽपि देवा अर्चिता भवन्ति। यज्ञादिभ्यो नारायणार्चनमेव श्रेष्ठतमम्। सर्वाणि शास्त्राणि नारायणार्चनमेव मोक्षसाधनमाचक्षते। नारायणं परित्यज्य इतरदेवतोपासनेन किमपि फलं न भवति। यज्ञदानतपःकर्मापेक्षा अर्चनेन नारायणः सुप्रीतो भवति। अतो भगवदारधनक्रममहं भवद्भ्यो निरूपयामीति।

किञ्च मानवजीवनमतिदुर्लभम्। चतुरशीतिलक्षजन्मस्वेकदा मनुष्यजन्म लभ्यते। तत्रापि आयुः स्वल्पः। अर्धमायुषो निद्रया गच्छति। अवशिष्टे भागेऽधिकः कालो बाल्ये, यौवने, वार्धके, दारिद्र्ये, विषादे, जायापुत्रादिषु च नश्यति। वैषयिकसुखान् त्यक्त्वा सर्वोऽपि आत्मोज्जीवनाय शाश्वतसुखलाभाय च भगवदाराधनमेव कुर्यासुरहरहम्। तेन प्रसन्नो भगवान् अवश्यमिहैव जन्मनि मुक्तिं ददाति' इति।

पञ्चकालक्रियासु प्रथममभिगमनम्। सूर्योदयात्पूर्वमेवोत्थाय, कालकृत्यादिना शरीरशुद्धिं कृत्वा, स्नानोर्ध्वपुण्ड्रधारणसन्ध्यावन्दनादिना आत्मनो भगवदाराधनयोग्यता–सम्पादनमभिगमनमित्युच्यते। अभिगमनेन देहशुद्धिः, मनःप्रसादः, तत्त्वचिन्ता च जायन्ते।

वैष्णव एवं चिन्तयेत्–शरीरमित्येतत् केवलरक्तमांसभूयिष्ठं जराव्याधिग्रस्तं, नश्वरं, दिवारात्रं तापत्रयाभिभूतं, धनदारपुत्रेषणादिबहुदु–खैकभागिति। तत्कृतकर्मविपाकापनुतये भगवत्प्रसाद एव सम्पादनीय इति च।

एतद्ज्ञानप्रवृद्धः प्रपन्नो भवति। भगवन्तं स्मरणकीर्तनार्चनादिभिराराधयति।

पञ्चकालक्रियासु द्वितीयमुपादानम्। तच्च आराधनोपयोगि–द्रव्यसम्पादनरूपम्। अचेतनद्रव्यादीनां गन्धपुष्पफलादीनां सङ्ग्रहश्–चेतनस्यात्मनः पञ्चसंस्कारज्ञानप्रदानादिना च प्रपन्नं कृत्वा भगवदाराधने विनियोग इत्युभयमप्युपादानमेव भवति।

तृतीयमङ्गम् इज्या–यजनम्, आराधनम्। भगवदाराधनम् आन्तरं–बाह्यभेदेन द्विविधम्। पाञ्चरात्रप्रकियामाश्रित्याराधनं शुद्धमिति, मन्त्रसिद्धान्त इति चोच्यते। यागोपकरणादीन् विना मानसा यजनमान्तरमिति, बिम्बाराधनं बाह्ययजनमिति च परिकीर्त्यते। जले, कुम्भे, विग्रहे, यन्त्रे वा बाह्याराधनं चतुस्स्थानार्चनमित्युच्यते।

पौष्करसंहितायामपि मानसाराधनं प्रस्तुतम्। भगवन्तं दिव्यमङ्गल–विग्रहयुतं कल्याणगुणगणशोभितं, दिव्याभरण–दिव्यायुधधारिणं विचिन्तयन् षोडशोपचारैर्मनसैवाराधयेदिति। आन्तरयजनं सकलाभीष्टप्रदं भुक्तिमुक्तिफलदायकमिति चाभिहितम्।

बाह्ययजनं स्वार्थ–परार्थभेदेन द्विविधम्। स्वार्थजनं च प्रत्येकस्याभीष्टसिद्ध्यर्थं क्रियमाणं गृहार्चाराधनम्। इतरेषां सुखशान्त्य–वाप्त्यर्थमनुष्ठीयमानं देवालयार्चाराधनं परार्थयजनमित्युच्यते। आलयोऽपि विग्रहानुगुणं स्वव्यंव्यक्त–दैव–सिद्ध–मानुष–कल्पितभेदेन चतुर्विधम्। भगवतः परव्यूहविभवान्तर्याम्यर्चारूपेषु पञ्चावतारेषु अतिसानिन्नध्याद् अर्चावतार एव श्रेष्ठ इति तदाराधनमेव मुक्तेः सुलभोपाय इति चात्र सविवरणं निरूप्यते।

पञ्चमेऽध्याये बाह्ययजनाङ्गभूत–कुण्डयागादीनां निरूपणं कृतम्। यागोपयोगिनां कुण्डानां लक्षणानि, भेदाः पूर्णाहुतिपर्यन्तमुपयुज्यमानानि द्रव्याणि चात्र विव्रियन्ते। अग्निकार्यविधावत्र अग्नेस्स्वरूपं वर्णितम्। अग्निः एकग्रीवः, त्रिमुखः, द्विनसः, षडक्षः, त्रिपात्, सप्तजिह्वः, चतुःशृङ्गः, सप्तभुजः चतुर्भिर्दक्षिणबाहुभिः स्रुक्स्रुवाक्षमालाशक्त्यायुधधारी, त्रिर्भिवामभुजैः तोमर–व्यजन–घृतपात्रधारी, श्वेतवस्त्रालङ्कारी, वामाङ्के दक्षिणानाम्नीं भार्यामारोप्य, अजामारुह्य प्रकाशतेऽग्निदेवः।

षष्ठेध्याये मण्डलाराधनं वर्णयति। दीक्षास्वीकारे, प्रतिष्ठाविधौ,

विविधोत्सवेषु वार्षिकोत्सवेषु च मण्डलाराधाना विधीयते। मण्डं लातीति मण्डलम्। मण्डो नाम हर्षः। भगवतो हर्षजनकं यदाराधनं तन्मण्डलपदेनोच्यते। अत्र मण्डलस्य विविधानि लक्षणानि मण्डलभेदाश्च निरूपिताः। मुख्यशः चतुर्विधमण्डलानि प्रशस्तानि विव्रियन्ते। सर्वतोभद्र–चक्राब्ज–पञ्चपद्म–नवपद्मभेदेन। मण्डलानां विवरणं पौष्करसंहितायामप्युल्लिख्ते। वासुदेवः प्रधानतया सपरिवारः मण्डलेष्वाराधनीयः। अन्यदेवताराधनं मण्डलेषु क्रियते चेत् मिश्रयजनं भवति। तच्च निरर्थकमिति वर्ण्यते।

सप्तमेऽध्याये मुद्रालक्षणं, तद्भेदाश्च निरूप्यन्ते। दीक्षा, मण्डलं, मुद्रा इति त्रयोंऽशाः पाञ्चरात्राराधने मुख्यविषयाः। मुदं रातीति मुद्रा। भगवतो येन कर्मणा प्रसन्नता भवति, तन् मुद्रापदेनोच्यते। मानसिक–वाचिकभावनाः कायिकक्रियाकलापेनाऽनुष्ठीयमाना मुद्रा इत्युच्यन्ते। अञ्जलिः काचन मुद्रा। अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी इति आत्मगतप्रह्वीभावो नमस्कारेण मुद्रया प्रदर्श्यते। एवमेव द्विसप्ततिसङ्ख्याकाः मुद्रा, अस्मिन्नध्याये विशेषेण लक्षणशो निरूपिताः। तेषु न्यासमुद्राः, तत्त्वमुद्राः, व्यूहमुद्राः देवतामुद्राः आयुधमुद्राः, आभरणमुद्राः, परिवारमुद्राः, उपचारमुद्रा इत्येवं बहुशो विभज्य निरूपिताः।

अष्टमेऽध्याये आलयनिर्माण–विग्रहनिर्माणविषये नियमा निरूप्यन्ते। मानसाराधनापेक्षया विग्रहाराधनं वरमिति प्रस्तूयते। किमपि लक्ष्यं विना ध्यानं धारणं वा दुश्शकम्। अतो भगवतः साकारार्चनं विग्रहाराधनं उपासकोपयोगि भवतीति मुमुक्षूणां विग्रहाराधनबाह्ययजनं श्रेष्ठमुक्तम्। आलयनिर्माणोऽपि महच्छ्रेयो वर्तते। आलयनिर्मातुः आलयनिर्माणाय स्थलप्रदातुर्वा चिरकालमुन्नतलोकवासो भवति। आलयः शरीरं, तत्र प्रतिष्ठितो विग्रहः तदात्मभूतः परिगण्यते। आलयनिर्माणोपयोगीनि द्रव्याणि विग्रहनिर्माणो–पयोगीनि द्रव्याणि, निर्मातुर्योग्यता इत्यादिकं चात्र विस्तरेण निरूप्यते। नवमेऽध्याये विग्रहप्रतिष्ठादिकं तदुपयोगिकालो मानादिकञ्च प्रतिपाद्यते।

दशमेऽध्याये उत्सवादिकं वर्ण्यते। नित्योत्सव–पक्षोत्सव–मासोत्सव–संवत्सरोत्सवादिरूपेणोत्सवान् विभज्य विव्रियन्ते। उत्कृष्टः सवः उत्सव इति भगवदानन्दजनक उत्सव इति लक्षणमुच्यते। सर्वेषु यज्ञयागादिषु

भगवदाराधनमेव ज्यायः। अतस्तदेव उत्सवपदेनोच्यते। उत्सवकरणस्य प्रयोजनानि शान्तिः, अभिवृद्धिः पापप्रहाणमञ्चेत्येतानि निरूप्यन्ते।

एकादशोऽध्याये ध्वजारोहणविधिरुच्यते। वार्षिकोत्सवः ध्वजारोहणेनारभ्य, ध्वजावरोहणेन समाप्यते। गरुत्मतश्चित्रं पटे विलिख्य, ध्वजस्तम्भे उत्क्षिप्यते। गरुडः आकाशे उड्डयन् महोत्सवान्वयार्थं सर्वान् देवानाह्वयति इति, नवदिनपर्यन्तं समस्तमप्युत्सवं पर्यवेक्षयतीति ध्वजारोहणस्याभिप्रायः। ध्वजपटे विलिख्यमानस्य गरुत्मतश्चित्रवर्णनं सविस्तरमत्र निरूप्यते। स्वयं गरुत्मता अस्यां संहितायां स्वस्य स्वरूपमभिवर्ण्यते इत्यत्र विशेषः, समादरणीयता च वरीवर्ति। गरुत्मान् श्वेतवस्त्रधरः, शान्तः, पुष्पाञ्जलियुतः, स्वर्णवर्णः उड्डीयमानपक्षो वामपादं पुरतो दक्षिणापादमग्रतः प्रसार्य स्थितः, वृत्तायतलोचनः, नीलदीर्घाग्रनसः, वक्रदन्तः, स्वर्णकिरीटधारी, वक्रभ्रकुटिः, विशालवक्षाः, ललाटन्यस्ततिलकः, नीललोचनः, दीर्घबाहुः, पक्षद्विगुणीकृतायतपुच्छः, पन्नगाभरणः, शङ्खचक्रादिलाञ्छितश्च विराजते। शरीरावयवेषु सर्वत्र आभरणत्वेना–लङ्कृतानां विशिष्टनागानां नामानि, वर्णाश्चात्र विव्रियन्ते। कट्यामनन्तः, वासुकिः यज्ञोपवीते तक्षकः कटिबन्धे, कर्कोटकः हृदये, पद्म–महापद्मौ कर्णयोः, गुलिक–महागुलिको हस्तयोः आभरणत्वेन वर्ण्यन्ते। तेषां नागानां वर्णा अपि अत्र प्रदर्शिताः। अनन्तः श्वेतः, वासुकिः पटलः, तक्षकः हरिद्रावर्णः, कर्कोटको नीलः, शङ्खः, हिमवर्णः, गुलिकः कृष्णः, पद्मो रक्तः महापद्मो हरितः इत्येवं विशिष्टवर्णविवरणमपि सन्दृश्यते। ध्वजदण्डस्य पटस्य च मानमपि अत्र प्रस्तूयते।

द्वादशेऽध्याये अङ्कुरारोपणविधिरुच्यते। उत्सवेषु प्रथमदिने ध्वजारोहणानन्तरं सायमङ्कुरारोपणमनुष्ठीयते। चन्द्र आरोपितानङ्कुरान् संरक्षति। मृत्सङ्ग्रहणं कृत्वा नवधान्यानि क्षीरेण सह संप्रोक्ष्यन्ते। उत्सवकालं यावत् तान्यङ्कुराण्युत्पाद्य, नवमदिने ध्वजावरोहणानन्तरम् उत्पन्नान्यङ्कुराणि सम्पूज्य पवित्रक्षेत्रेषु वा नदी–कूप–तटाकजलेषु संत्यज्यन्ते। सुष्ठु प्रवृद्धान्यङ्कुरामुत्सवस्य साफल्यं सूचयन्ति। तदर्थमुपयुज्यमानानां घटिकानां चतुर्विंशतिप्रकाराणां शरावाणां पालिकानाञ्च लक्षणान्यत्र विव्रियन्ते। तदनु दशदिक्षु भूतबलिर्निवेद्यते। दशदिक्षु स्थितभूतानां

तत्तन्नामानि तेषां प्रियं नैवेद्यं चात्र विस्तरेण सङ्कीर्त्यन्ते। तदनू– उत्सवारम्भसूचकतया भेरीताडनं क्रियते।

त्रयोदशेऽध्याये रथोत्सवो निरूप्यते। रथनिर्माणे, प्रतिष्ठायां, रथयात्राया नियमा अत्र विव्रियन्ते। (अस्मिन्नध्याये मातृकायां ग्रन्थपातः ४६–६० दृश्यते।) रथनिर्माणविधिमधिकृत्य पञ्चदशश्लोकाः अत्र नैवोपलभ्यन्ते। कतिपयसंहिता एव रथनिर्माणमधिकृत्य विचारयन्ति। गरुडो भगवतो वाहनमिति कृत्वा रथोऽपि गरुडशरीरमित्येव कीर्त्यते। रथाङ्गेषु प्रतिष्ठापनीयानां देवताविग्रहादीनाञ्च विवरणमत्र दृश्यते। इन्द्रादिदिक्पाला रथाङ्गेषु चक्रेषु संस्थाप्यन्ते। चक्राङ्गेष्वरेषु गरुडस्य चत्वारि रूपाणि सत्य–सुवर्ण–गरुड–ताक्ष्र्यनामकानि, चक्रनेमिषु मायादेवी, रथस्योभयपार्श्वयोः सूर्यचन्द्रौ च प्रतिष्ठाप्यन्ते। नवाह्निकमहोत्सवे तत्तद्दिनेऽनुष्ठीयमाना वाहनयात्राः क्रमशोऽत्र निरूपिताः। चतुर्दशेऽध्याये स्नपनविधिरुच्यते। तदनन्तरं महोत्सवाङ्गतया पुष्पयागो निरूप्यते। भद्रकमण्डले पुष्पयागोऽनुष्ठेयः। महोत्सवानुष्ठानस्य श्रीवैकुण्ठावाप्तिः फलमुच्यते। वेदाध्ययनात् तपसो यज्ञदानादिभ्यश्च महोत्सवानुष्ठानं परं श्रेष्ठमित्युच्यते।

पञ्चदशेऽध्याये महोत्सवा निरूप्यन्ते। चैत्रमासे जलक्रीडोत्सवः श्रीरामनवमीजयन्त्युत्सवः, वैशाखमासे विशोखोत्सवः, ज्येष्ठमासे स्नपनोत्सवः, श्रावणमासे श्रीकृष्णजयन्त्युत्सवः, भाद्रपदमासे पवित्रोत्सवः, आश्वियुजमासे प्लवोत्सवो विजयदशम्युत्सवश्च, पुष्यमासे अग्रायणोत्सवः, माघमासे मदनोत्सवः, फाल्गुनमासे कल्याणोत्सव इत्येते उत्सवा अनुष्ठेया इति, तत्तदुत्सवस्य फलादिकञ्च सविस्तरं निरूप्यन्ते। अध्ययनोत्सवस्य मोक्षोत्सव इत्यपि नामान्तरमस्ति।

षोडशेऽध्याये ब्रह्मणः स्वरूपं निरूप्यते। योगपादविषयाः अस्मिन्नध्याये विचार्यन्ते। काश्चन संहिता व्यूहसिद्धान्तं परामृशन्ति। परवासुदेवः परमात्मा स्वीयैः दिव्यैः षड्गुणैर्ज्ञानशक्तिबलैश्वर्यवीर्यतेजोभिर्वासुदेव–सङ्कर्षण–प्रद्युम्नानिरुद्धनामभिः चतुरो व्यूहान् आविश्चकार। चतुर्भ्यस्तेभ्यो व्यूहेभ्यः केशवादिद्वादशरूपाणि मुमुक्षूणां ध्यानोपयोगार्थमुत्पन्नानि। तथैव ब्रह्माण्डोत्पत्तिस्सर्वाऽपि चातुर्व्यूहादेव भवति। जगतः परवासुदेव आत्मा,

परवासुदेवस्य जगत् शरीरम्। एवं जगद्ब्रह्मणः शरीरशरीरिभावो वरीवर्ति। शरीरे प्राण इव जागतो वासुदेवो मुख्यः। परवासुदेवादेव महालक्ष्म्या सह व्यूहवासुदेव उत्पन्नः, व्यूहवासुदेवो ज्ञानशब्दाभ्यां सङ्कर्षणमुत्पादयति। सङ्कर्षणः कीर्त्या सह वीर्यैश्वर्याभ्यां प्रद्युम्नं जनयति। प्रद्युम्नः सूर्यचन्द्रयोः वाय्वग्न्योः, मेघार्णवयोश्च प्रशासकः। प्रद्युम्नो जयया सह शक्तितेजोगुणाभ्यां अनिरुद्धमाविष्कारोति। अनिरुद्धो मायया युतस्सन् क्षीरार्णवे शेषपर्यङ्के शयानः, ब्रह्माण्डं सर्वं सृजति रक्षति च। तस्मादेव विभवावतारो रामकृष्णादयः सम्पद्यन्ते। क्षीरार्णवस्यैव अवतारकन्द इति, व्यूहवैकुण्ठमिति नामान्तरम्। चत्वारो व्यूहा वासुदेव–सङ्कर्षण–प्रद्युम्नानिरुद्धाः परवासुदेवस्यैवावताराः। चतुर्भ्यो व्यूहेभ्यः केशवादयो द्वादशविभवावतारा ध्यानोपयोगिनः सञ्जायन्ते। वासुदेवात् केशव–नारायण–माधवाः, सङ्कर्षणाद् गोविन्द–विष्णु–मधुसूदनाः प्रद्युम्नात् त्रिविक्रम–वामन–श्रीधराः, अनिरुद्धात् पद्मनाभ–हृषीकेश–दामोदराश्च अवतीर्णाः। अनिरुद्धात् मत्स्य–कूर्माद्यवताराः धर्मसंस्थापना–र्थमुत्पद्यन्ते। सर्वेषामेतेषां व्यूहावताराणां विभवावताराणाञ्च चान्तरात्मा परवासुदेव एवेति वर्ण्यते।

सप्तदशोऽध्यायः शिष्याचार्ययोर्लक्षणानि निरूपयति। आचार्यः शिष्यस्य भगवत्प्राप्तौ सेतुरित्युच्यते। दीक्षाया लक्षणमित्थमुक्तम्–संसारं नाशयित्वा मुक्तिदायकः संस्कारो दीक्षेत्युच्यते इति।

अष्टादशाध्याये मुमुक्षोः प्रपन्नस्य दीक्षा प्रकारो निरूप्यते। एकोनविंशेऽध्याये षडध्वन्यासः सृष्टिप्रकारः सविवरणं प्रस्तूयते। दीक्षितस्य शिष्यस्य आचार्यः भगवद्ज्ञानमुपदिशति। तदङ्गतया सर्वलोकस्रष्टारं परमात्मानं निरूपयन् भगवत्कृतव्यष्टिसमष्टिसृष्टिप्रक्रियां विवृणोति अस्मिन्नध्याये। पाञ्चरात्रसंहितासु कतिपयसंहिताः प्रधानभूता एवास्मिन् विषये व्याकुर्वन्ति। षण्मार्गेषु कृता सृष्टिर्दीक्षितेनोपासनात् पूर्वं ज्ञातव्या। अत्र कार्यकारणरूपेण षडध्वन्यासो विधीयते। षडध्वानश्च कला–तत्त्व –भुवनानि कार्यवच्यरूपाणि, वर्ण–मन्त्र–पदानि कारणवाचकरूपाणि। एवमेव कलाध्वा कारणं भवति चेत् तत्त्वाध्वा कार्यं भवति। तत्त्वाध्वा कारणं चेद् भुवनाध्वा कार्यं भवति। तथैव वर्णाध्वा मन्त्रध्वानं, मन्त्राध्वा पदाध्वानञ्च सृजति। लोहे अग्निरिव सर्वेश्वरः स्रष्टा सर्वत्र लोके व्याप्य भवति।

### कलाध्वा

कला इत्येतद् ब्रह्मणोऽविभक्ता शक्तिः। चेतनाचेतनात्मकं सर्वं जगत् कलाशब्देन, सत्त्वरजस्तमोमयी प्रकृतिशब्देन च गीयते। तत्स्वामी भगवान् वासुदेवः।

### तत्त्वाध्वा

वासुदेवः स्वशक्त्या सत्त्वरजस्तामोमय्या कलया सङ्कर्षण–प्रद्युम्नानिरुद्धाख्यान् त्रीन् व्यूहान् सृजति। एते विकला इच्युच्यन्ते। विकला नाम कलाया भाग इत्यर्थः। अनिरुद्धव्यूहात् तत्त्व–महदहङ्कार–ब्रह्माण्डान्युत्पाद्यन्ते। अयं सृष्टेः तत्त्वाध्वा इत्युच्यते।

### भुवनाध्वा

चतुर्दशभुवनात्मकब्रह्माण्डरूपेण सृष्टिर्निरूप्यते। चतुर्दशभुवनानां स्थितिः परिमाणादिकं सर्वमत्र प्रस्तूयते। भूमेरूर्ध्वं षड्लोकाः, भूमेरधः सप्तलोकाः सविवरणमत्र निरूप्यते। भूमेरुपरि ब्रह्मलोकः त्रयोदशलक्षयोजनपरिमिते दूरे वरीवर्ति इति गरुत्मान् विवृणोति। भूमेरुपरि सूर्यो लक्षयोजनदूरेऽस्ति। ततो लक्षयोजनेषु चन्द्रः, ततो लक्षयोजनेषु नक्षत्राणि, ततो द्विलक्षयोजनेषु बुधग्रहः, ततो द्विलक्षयोजनेषु शुक्रग्रहः, ततो द्विलक्षयोजनेषु बृहस्पतिः, ततो द्विलक्षयोजनेषु शनिग्रहः, ततो लक्षयोजनेषु सप्तर्षिमण्डलम्, ततो लक्षयोजनेषु ध्रुवतारः इत्येवं भूलोकाद् ध्रुवपर्यन्तं त्रयोदशलक्षयोजनानि वर्तन्त इति परिगणयति गरुत्मान्। भूमेरारभ्य सूर्यमण्डलपर्यन्तं भूलोक इति, सूर्यलोकाद् ध्रुवपर्यन्तं भूवर्लोकः, ध्रुवमण्डलात् सत्यलोकपर्यन्तं स्वर्लोक इति च व्यवहारः कृतः। भुवर्लोकात् कोटियोजनपरिमिते दूरे महर्लोकः, ततो कोटिद्वययोजनेषु जनो लोकः, ततः चतुर्गुणितदूरे तपोलोकः, ततः षड्गुणिते दूरे सत्यलोकश्च विराजन्त इति, आहत्य भूलोकाद्, ब्रह्मलोकपर्यन्तं षष्ठिकोटियोजनानां दूरमस्ति।

इतः परं भूलोकपरिमाणं, सप्तद्वीपा वसुमती च प्रस्तूयन्ते। सूर्यचन्द्रयोः किरणानि यावत् पतन्ति सा भूमिरित्युच्यते। भूमिः सप्तसमुद्रैः सप्तद्वीपैश्च परिवृता। तत्र वर्तमानानां नदीनां पर्वतानां चात्र नामग्राहं विवृणोति। भूम्या समान आकाशः ऊर्ध्वलोकान् विभाजयति। भूमिः जम्बू–प्लक्ष–शाल्मल–कुश –क्रौञ्च–शाक–पुष्करनामकैः सप्तद्वीपैः, लवण–इक्षु–सुरा–सर्पि–दधि

दुग्ध–जलसमुद्रैः सप्तसमुद्रैः परिवृता वर्तते। शाकद्वीपमध्ये श्वेतद्वीपः तत्र शेषशयने अनिरुद्धो लक्ष्म्या मुक्तपुरुषैश्च सह विराजते।

जम्बूद्वीपो लक्षयोजनविस्तीर्णः, लक्षयोजनात्मकेन लवणसमुद्रेण परिवृतः, नवसहस्रयोजनपरिमितेषु नवसु वर्षेषु विभक्तः। नववर्षेषु मध्ये जलावृतवर्षे मेरुनामकः कनकगिरिः चकास्ति। स भूमेरुपरि चतुरशीतिसहस्रयोजनानि, षोडशसहस्रयोजनानि भूमेरधोभागे च व्याप्तः। मेरोः परितो नववर्षा वर्तन्ते। दक्षिणतो भरतवर्षः, किम्पुरुषवर्षः, हरिवर्ष इति त्रयः, उत्तरतो रम्यकः, हिरण्मयः, उत्तरकुरुः इति त्रयः, पूर्वपश्चिमयोः मध्ये च किन्नरवर्षः, जलावृतवर्ष इति त्रयो वर्तन्ते। एवमेव मेरोः परितः अष्टौ कुलपर्वताः सन्ति। ते च हिमवान्, हेमकूटः, निषध इति त्रयो दक्षिणतः, नीलः, श्वेतः, शृङ्गः इति त्रय उत्तरतः, मलयः पश्चिमस्यां, गन्धमादनः पूर्वस्यां दिशि च उपलक्षयन्ते।

तत्र भरतवर्षः उत्तरदक्षिणयोः हिमालय–सागरयोः मध्यस्था सहस्रयोजनमिता भूमिः। कर्मभूमिरितित्यस्य व्यवहारः। मोक्षावाप्त्यर्थमत्र कृतं कर्म सफलं भवति। सप्त मुख्यपर्वता अत्र निर्दिश्यन्ते–महेन्द्रः, मलयः, सह्यः, शुक्तिमान्, ऋक्षः, विन्ध्यः, पारियात्र इति, यत्र महर्षयो वासुदेवप्रसादार्थं तपश्चरन्ति। भरतवर्षे नवद्वीपा विभक्ताः सन्ति। ते च इन्द्रद्वीपः, कुशेरुद्वीपः, ताम्रद्वीपः, गभस्तिमत्द्वीपः, नागद्वीपः सौम्यद्वीपः, गन्धर्वद्वीपः, वरुणद्वीपः, समुद्रावर्तसंस्थद्वीप इति।

**प्लक्षद्वीपः**

जम्बूद्वीपस्य द्विगुणितः प्लक्षद्वीपः। सप्तमेधातिथिरस्य राजा। तस्य सप्तपुत्राः–सन्नह्यः, शिशिरः, सुखोदयः, आनन्दः, शिवः, क्षेमकः, ध्रुव इति। सप्तनद्योऽत्र द्वीपे स्रवन्ति–अनुतप्ता, शिखी, विपक्षा, त्रिदिवा, कल्मा, अमृता, सुकृता चेति। द्वीपोऽयं द्विलक्षयोजनमितेन इक्षुसमुद्रेणावृतः।

**शाल्मद्वीपः**

प्लक्षद्वीपस्य द्विगुणितः शाल्मद्वीपः चतुर्लक्षयोजनात्मकः तावत्परिमितेन सुरासमुद्रेणावृतः। अस्य राजा वपुष्मान्, तस्य पुत्राः–श्वेतः, हरितः, जीमूतः, रोहितः, वैद्युतः, मानसः, सुप्रभः, प्रजाप्रिय इत्यष्टौ।

**कुशद्वीपः**

अष्टलक्षयोजनपरिमितः प्लक्षदीपः तावता सर्पिसमुद्रवृतः। ज्योतिष्मान् तस्य सप्तपुत्रा उद्भेदः, वेणुमान्, वैश्यः, लम्बनः, धृतिः, प्रभाकरः, कपिल इति अस्य पालकाः। दानवाः किम्पुरुषाश्चात्र चरन्ति।

**क्रौंञ्चद्वीपः**

षोडशलक्षयोजनमितः क्रोञ्चदीपः तावत्परिमितेन दधिसागरेण परिवृतः, द्युतिमता तस्य सप्तपुत्रैश्च पालितः। ते च कुशलः, मङ्गदः, उष्णः, पीवरः, अन्धकारकः, मुनिः, दुन्दुभिश्चेति सप्त। देवनागा अत्र निवसन्तो वासुदेवं तपश्चरन्ति। गौरी, कुमुद्वती, सन्ध्या, रात्रिः, मनोजवा, क्षान्तिः, पुण्डरीकेत सप्तनद्योऽत्र प्रवहन्ति।

**शाकद्वीपोः**

द्वात्रिंशल्लक्षयोजनायतोऽ शाकद्वीपः तावत्परिमितक्षीर– सारेणावृतः भव्येन तत्पुत्रैश्च परिपालितोऽस्ति। ते च सप्त–जलदः, कुमारः, सुकुमारः, मरीचिकः, कुसुमोदः, मौदकिः, महाद्रुमश्चेति। सुकुमारी, कुमारी, नलिनी, धेनुका, इक्षुः, रेणुका, गभस्तिश्चेति सप्तनद्योऽत्र प्रवहन्ति। अत्रत्याः पुरुषा धर्ममनुसरन्तः सत्यरूपिणं विष्णुमाराधयन्ति। क्षीराब्धौ मध्ये श्वेतद्वीपो व्यूहवैकुण्ठापरनामको वरीवर्ति। नित्यमुक्तजीवानामावासभूतेऽत्र शेषशय्यामधिष्ठाय जगद्रक्षणनिमग्नो विष्णुरनिरुद्धावतारेण नित्यमुक्तसेवितो विराजते।

**पुष्करद्वीपः**

चतुष्षष्ठिलक्षयोजनमितः तावता परिमितेन जलार्णवेनावृत पुष्करद्वीपः। सवननामकराज्ञा तत्पुत्राभ्यां महावीर–घातकिनामकाभ्यां च पलितो वर्तते। तत्र मध्ये न्यग्रोधवृक्षे चतुर्मुखो ब्रह्मदेवो देवदानवसेवितो राजते। तत्रत्यानामायुः प्रमाणं सहस्त्रं वत्सराः। जलार्णवस्य परितो द्विगुणितः सुवर्णभूमिः प्राणिजातरहितो लोकालोकनामकपर्वतैः परिवृतः समस्ति। स महान्धकारेण, तदनु अण्डकटाहेण चावृतो भवति।

भूमेरुपरिभागो भूलोक इति, तदुपरि अन्तरिक्षादारभ्य सूर्यमण्डललपर्यन्तं भुवर्लोक इति, सूर्यमण्डलाद् ध्रुवमण्डलपर्यन्तो भागः

स्वर्लोक इति, तत उपरि सप्तमः सत्यलोकः प्रस्तूयते। तत्र विष्णुर्जयाख्यया पत्न्या सहितः, वैराजपुरुषाकारेण चतुर्मुखब्रह्मणा सर्वानपि लोकान् सृजति।

भूमेरधः सप्तलोकाः पातालसञ्ज्ञकाः प्रत्येकं दशसहस्रयोजन–विस्तीर्णाः, अतल–वितल–नितल–गभस्तिमत्–महत्– सुतल–पातालाभिधा दैत्य–दानव–यक्षानामावासभूमयः सन्ति। सप्तलोकयुतां भूमिमधः महासर्प आदिशेषाख्यः स्वफणासु धारयन् वसति। पाताले चतुर्विंशतिसङ्ख्याक नरकाः पापिनां जननां कर्मफलानुभवाय निर्मिताः। वासुदेवपरायणाः नरकं नैव विशन्तीति, विष्णुपदं प्राप्य नित्यसुखिनो भवन्तीति, तद्ज्ञानार्थं भुवनाध्वा उपदिश्यत इति चात्र प्रस्तूयते।

वर्णाध्वा नाम अक्षराणां सृष्टिप्रकारः। पञ्चविंशतिसङ्ख्याकाः ककारादि– मकारान्ता वर्णा मन्त्रोपयोगिनोऽत्र विव्रियन्ते।

पदाध्वा नाम वेदशास्त्रपुराणेतिहासानामुत्पत्तिः। ब्रह्मस्वरूपनिरूपणार्थं भगवता साक्षात् परम्परया च प्रवर्तितः। दीक्षासमये आचार्यः शिष्याय षडध्वनिरूपणं विशदयति।

विंशेऽध्याये केवलं पञ्चैव श्लोका उपलभ्यन्ते। अत्र ग्रन्थपातो दृश्यते।

एकविंशोऽध्यायः मन्त्रकोशनामकः। दिव्यमन्त्राणाम् अष्टाक्षर–द्वादशाक्षर–व्यूहमूर्तिमन्त्रादीनां समुद्धरणं, रचनं, मन्त्रानुष्ठानस्य फलमित्यादयोऽत्र निरूप्यते। मन्तारं त्रायत इति मन्त्र इति मन्त्रनिर्वचनं कृतम्। तत्तद्देवतानामभिः पूर्वापरयोः प्रणव–नमश्शब्दयोगेन देवबीजाक्षरयोगेन मन्त्राणामारचनं मन्त्रोद्धार इत्युच्यते। मन्त्रो देवताप्रापणे सेतुरिति, सर्वेषु देवेषु प्रधानो नारायण इति हेतोरष्टाक्षरीमन्त्र एव श्रेष्ठ इति, तस्य मूलमन्त्र इति नामान्तरमिति, तदनुष्ठाता जीवन्मुक्तो भवतीति चात्र प्रस्तूयते।

द्वाविंशोऽध्याय उपसंहाररूपः। शास्त्रेऽस्मिन् निरूपिता विषयाः सर्वेऽत्र सङ्क्षिप्यन्ते। तथैव भगवतः अर्चावतारक्षेत्राणि तीर्थपदेनाष्टोत्तर –शतसङ्ख्याकानि च सङ्कीर्त्यन्तेऽस्मिन्नध्याये। रहस्यमन्त्राणामनुष्ठान–मर्थज्ञानेन सह कर्तव्यम्, अन्यथा सिद्धिर्न भवति। महालक्ष्मीर्भगवतः शक्तिः। उपासकस्यात्मानं श्रीवैकुण्ठादेव दर्शयन् भगवत्प्राप्तौ सहकरोति।

भगवान् नारायण आश्रितजनोद्धरणाय अष्टोत्तरशतक्षेत्रेष्वर्चारूपेण स्वयमवतीर्णः। तानि क्षेत्राणि दिव्यदेशपदेन व्यवह्रियन्ते। तेष्वष्टौ क्षेत्राणि सुप्रसिद्धानि वर्ण्यन्ते–श्रीरङ्गम्, श्रीमुष्णम्, वेङ्कटाद्रिः, सालग्रामम्, नैमिषम्, तोताद्रिः, पुष्करः, बदरिकाश्रमश्चेति। एतत्सर्वं शास्त्रे विवृण्वन् भगवदर्चनाप्रकारं प्रतिपादयन् भगवान् गरुत्मान् हिमालयेभ्यः श्रीवैकुण्ठं प्रति निवृत्तः। भरद्वाजादयश्च महर्षयः शास्त्रमिममुपास्य मुक्ता जाताः। शास्त्रान्ते फलश्रुतिरेवं वर्तते–वैहायसीसंहितामिमाम् अधीयानानां वैकुण्ठं, वैकुण्ठनाथश्च सुलभ इति।

**अहो धन्याश्च धन्यं च तन्त्रं वैहायसं शुभम्।**
**पठन्ति ये पाठयन्ति ध्यायन्त्यर्थं सदा हृदि।।**
**वैकुण्ठं तस्य नाथश्च दुर्लभो नास्ति सर्वथा।।**[११]

***

११. वैहायसीसंहितायम् अन्ते फलश्रुतिनिरूपणे।

**डॉ० मङ्गलारामः**
जोधपुरम्

# व्याकरणवाङ्मयेऽष्टाध्यायीकाराचार्यपाणिनेरवदानम्

यानि प्राचीनार्षव्याकरणान्यभवन्संस्कृतभाषायास्तेषु सम्प्रत्येकमात्रं पाणिनीयव्याकरणं साङ्गोपाङ्गरूपेणोपलब्धम्। पाणिनीयव्याकरणं प्राचीनवाङ्मयस्यैकानुपमनिधिरस्ति। अनेन वेदवाण्याः प्राचीनार्वाचीन–समस्तवाङ्मयं सूर्यालोकवत्प्रकाशमानमस्ति। प्रतिविद्वानस्याः सुसम्बद्धसुन्दरक्षमतापूर्णरचनायाः प्रशंसनं करोति। भारतीयप्राचीनाचार्याणां सूक्ष्मचिन्तनसुपरिपक्वज्ञानस्याद्भुतप्रतिभायाश्च निदर्शकोऽयमनुपम–ग्रन्थोऽस्ति। अनेन वेदवाणी परमगौरवान्वितास्ति। सर्वस्मिन् जगति कस्या अपीतरप्राचीन–भाषाया ईदृक्परिष्कृतव्याकरणं नाभवत्।

प्राचीनभारतीयव्याकरणग्रन्थेषु पाणिनेः कृते पाणिनपाणिनिदाक्षीपुत्र–शालङ्किशालातुरीयाहिकपाणिनेयपणिपुत्रप्रभृतिशब्दानां व्यवहारः प्राप्यते। इदं निश्चितं यत् सङ्ग्रहकारव्याडिः पाणिनेर्मातृभ्राताऽऽसीत्। छन्दःशास्त्रप्रवक्ता पिङ्गलः पाणिनेरनुज आसीत्। पाणिनेर्गुरुर्वर्ष आसीत्कथासरित्साग–रानुसारेण। **‘उपसेदिवान्कौत्सः पाणिनिम्’**[1] इति व्याकरणमाहाभाष्य–वचनानुसारेण **‘अनूषिवान्कौत्सः पाणिनिम्’ ‘उपशुश्रुवान्कौत्सः पाणिनिम्’**[2] इति च काशिकावृत्तिवचनेन सिध्यति यत्कौत्सः पाणिनेः शिष्य आसीत्। **‘पूर्वपाणिनीयाः अपरणाणिनीयाः’**[3] इति काशिकावृत्तिवचनेन ‘उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः **केचिदाकडारादेका सञ्ज्ञा इति केचित्प्रास्कडारात्परं कार्यमि’ति**[4] व्याकरणमहाभाष्यवचनेन सिद्धं

---

१. व्याकरणमहाभाष्ये, ३/२/१०८
२. काशिकावृत्तौ, ३/२/१०८
३. तत्रैव, ६/२/७०४
४. व्याकरणमहाभाष्ये, १/४/१

यत्पाणिनेर्नैकाः शिष्या आसन् तेन च स्वशब्दानुशासनस्यापि नैकवारं प्रवचनं कृतम्। पाणिनेरभिजन आसीच्छातालरो ग्रामः। 'गोपर्वतमिति स्थानं शम्भोः प्रख्यापितं पुरा, यत्र पाणिनिना लेभे वैयाकरणिकाग्रयता' इति स्कन्दपुराणवचनेनानुसारेण पाणिनिर्गोपर्वते तपस्यामकरोत् तत्प्रभावेण च वैयाकरणेषु प्रमुखता प्रापिता तेन।

पाणिनेः कुलमासीदत्यन्तसम्पन्नम्। स च स्वशब्दानुशासनाध्येतॄणां कृते भोजनप्रबन्धमकरोत्। तद्गृहे छात्रैर्विद्यया सह भोजनमपि प्राप्यते स्म। एतद्भावप्रकटकोदाहरणं **'ओदनपाणिनीयाः'**[५] इति भाष्ये दत्तम्।

'सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिनेः, मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।

छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्, **अज्ञानावृतचेत–सामतिरूषां कोऽर्थस्तिरश्चां गुणैः'**[६] इति पञ्चतन्त्रवचनेन मन्यते यत् पाणिनिः सिंहेन त्रयोदशीतिथौ मारितः।

पाणिनीयशब्दानुशासनस्य सूक्ष्मपर्यवेक्षणेन ज्ञायते यत् पाणिनिर्न केवलं शब्दशास्त्रपरिज्ञाताऽऽसीदपितुसमस्तप्राचीनवाङ्मये तदप्रतिहतगतिरासीत्। वैदिकवाङ्मयेन सह भूगोलेतिहासमुद्रशास्त्रलोकव्यवहारप्रभृतिविषयाणामपि स अद्वितीयविद्वान्नासीत्। तच्छब्दानुशासनं न केवलं शब्दज्ञानायापितु प्राचीनभूगोलायेतिहासाय च एको महान् प्रकाशस्तम्भोऽस्ति। पाणिनिरचिताष्टाध्यायीग्रन्थोऽतिप्राचीनार्वाचीनकाले नियन्त्रणकारिसेतुरस्ति। महाभाष्यकारपतञ्जलिः पाणिनिविषये लिखति यत् **'सामर्थ्ययोगान्नहि किञ्चिदस्मिन्पश्यामि शास्त्रे यदनर्थकं स्यात्'।**[७] 'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य'[८] इति काशिकावचनेन स्पष्टं यत् सूत्रकारपाणिनेर्दृष्टिरतिसूक्ष्मा–ऽस्ति। स साधारणस्वरस्याप्युपेक्षा न करोति।

---

५. तत्रैव, १/१/७३

६. पञ्चतन्त्रे, मित्रसम्प्राप्तिः, श्लोकः ३६

७. व्याकरणमहाभाष्ये, ६/१/७७

८. काशिकावृत्तौ, ४/२/७४

प्रसिद्धश्चिनीयात्री ह्यूनसाङ्गोऽपि लिखति यदृषिः पाणिनिः पूर्णमनसा शब्दभण्डाराच्छब्दचयनप्रारम्भोऽकरोत् सहस्रैकदोहेषु सर्वा व्युत्पत्ती रचिता तेन च। प्रतिश्लोकं द्वात्रिंशच्छब्दात्मक आसीत्। अस्मिन् प्राचीनार्वाचीनसम्पूर्ण–लिखतिं ज्ञानं परिसमाप्तवान्। शब्दाक्षरविषयकः कोऽपि पक्षः शेषो नाभवत्। ऋग्वेदभाष्यकारो वेङ्कटमाधवः कथयति यद् ऋग्वेदस्य त्रयो ज्ञातारः सन्ति शाकल्यः पाणिनिर्यास्कश्च।[९] वेदार्थे सर्वप्रधानसाधनमस्ति स्वरज्ञानम्। पाणिनिः स्वरशास्त्रस्य सूक्ष्मविवेचनदृष्ट्या न केवलं प्रत्यये आदेशस्य च ञिच्चिन्नित्प्रभृत्यनुबन्धेषु ध्यानमदददपितु चतुश्शततमसूत्राणि केवलं स्वरविशेषपरिज्ञानायारचयन्। अनेन पाणिनेर्वेदज्ञता विस्पष्टाऽस्ति। पाश्चात्त्यविद्वान् हण्टरो लिखति यद् जगति व्याकरणेषु पाणिनेर्व्याकरणं सर्वश्रेष्ठमस्ति। तस्य वर्णशुद्धता भाषाधात्वन्वयसिद्धान्तः प्रयोगविधयश्चाऽद्वितीया अपूर्वाश्च सन्ति। इदं व्याकरणं मानवमस्तिष्कस्यात्यन्तमहत्त्वपूर्ण आविष्कारोऽस्ति।

पाणिनीयशास्त्रस्य चत्वारि नामानि सन्ति अष्टकमष्टाध्यायी शब्दानुशासनं वृत्तिसूत्रञ्च। पाणिनीयतन्त्रस्य प्रमुखोपजीव्यमस्त्यापि–शलतन्त्रम्। 'पाणिनोपज्ञमकालकं व्याकरणम्' इति चन्द्रगोमिविवेचनेन **'पाणिन्युपज्ञमकालकं व्याकरणम्'**[१०] इति काशिकावचनेन च स्पष्टं भवति यत्कालविषयकपरिभाषाहीनं व्याकरणं प्रथमतः पाणिनिना रचितम्। पुरा व्याकरणेषु भूतभविष्यदनद्यतनप्रभृतिकालानां विविधपरिभाषाः अलिखन्। पाणिनिः तल्लोकप्रसिद्धत्वात्ताः अत्यजन् एतद्विषयं **'कालोपसर्जने च तुल्यम्'**[११] इति सूत्रे स्वयं पाणिनिना उत्थापितम्। पाणिनिना मन्यते यत् कालस्य विविधसञ्ज्ञानामर्था लोकविज्ञाताच्छास्त्रे परिभाषितकरणस्यावश्यकता नास्ति। महाभाष्यकारेण लिखितं यदष्टाध्याय्याः प्रयोजनं प्रमुखमस्ति

---

९. शाकल्यः पाणिनिर्यास्क इत्यृगर्थ–परास्त्रयः।
मन्त्रार्थानुक्रमण्याम्, ऋग्भाष्यम्, ८/१

१०. काशिकावृत्तौ, २/४/२१

११. अष्टाध्याय्याम्, १/२/५७

शिष्टप्रयोगाणां ज्ञानस्य मार्गप्रदर्शनकरणम्।[१२] पाणिनिना सम्पूर्णाष्टाध्यायी संहितापाठे रचिता। व्याकरणमहाभाष्यप्रदीपोद्योतेन सिध्यति यत्पाणिनिना समस्तसूत्रपाठ एकश्रुतिस्वरे पठितः।

आचार्यपाणिनिनाऽष्टाध्याय्याः प्रथमाध्यायस्य तृतीयपादस्य प्रारम्भे द्वितीयसूत्रादष्टमसूत्रपर्यन्तं सप्तसूत्रेष्वित्सञ्ज्ञाविधानं कृतम् **'उपदेशेऽजनुनासिक इत्'**[१३] **हलन्त्यम्**[१४] **'न विभक्तौ तुस्माः'**[१५] **आदिर्ञिटुडव'**[१६] **'षः प्रत्ययस्य'**[१७] ' **'चुटू'**[१८] **'लशक्वतद्धिते'**[१९] च।

आचार्यः पाणिनिः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेणानुनासिका–नामित्सञ्ज्ञाया विधानं कृतवान्। आचार्यस्य प्रकृतसूत्रविधानेन कथ्यमिदं यदुपदेशावस्थायामनुनासिकानामित्सञ्ज्ञा भवति। महाभाष्यकारार्चापतञ्जलिः उपदेश इति शब्दस्थाने उपदेशन इति शब्दव्यवहारः करोति।[२०] काशिकाकारो जयादित्यवामनः उपदेश इति शब्दस्य 'उपदिश्यतेऽनेनेत्युपदेशः इयं व्युत्पत्तिः कुर्वन् शास्त्रवाक्यसूत्रपाठखिलपाठान् उपदेशः कथितवान् तत्र येऽचोऽनुनासिकाः सान्ति तेषामित्सञ्ज्ञा स्वीकृता।[२१] आचार्यो नागेशभट्टोऽज्ञातवर्णानां स्वरूपज्ञानाय पाणिनिकात्यायन–पतञ्जलिमुनिभिरुच्चरितवर्णसमुदायस्योपदेशरूपेण कल्पना कृतवान्।[२२]

---

१२. शिष्टपरिज्ञानार्था अष्टाध्यायी।
व्याकरणमहाभाष्य्म्, ६/३/१०६

१३. अष्टाध्यायय्याम्, १/३/२

१४. तत्रैव, १/३/३

१५. तत्रैव, १/३/४

१६. अष्टाध्याय्याम्, १/३/५

१७. तत्रैव, १/३/६

१८. तत्रैव, १/३/७

१९. तत्रैव, १/३/८

२०. उपदेशने योऽनुनासिकः स इत्सञ्ज्ञा भवतीति वक्तव्यम्।
–व्याकरणमहाभाष्ये, १/३/२

२१. उपदिश्यतेऽनेनेत्युपदेशः शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च।
तत्र योऽनुनासिकः स इत्सञ्ज्ञो भवति। –काशिकावृत्तौः, १/३/२

२२. अन्त्यपदोपदेशपदाभ्यां प्रत्यासत्त्या अज्ञातस्वरूपज्ञापकोच्चारणविषयसमुदायं प्रति अन्त्य इह गृह्यते।–लघुशब्देन्दुशेखरे, १/३/२

आचार्यपतञ्जलिना प्रत्यक्षाख्यानमुपदेश इति कथितम्।[२३] प्रदीपकारकैय्यटे– नेन्द्रियगोचरार्थाख्यानमुपदेश इति मन्यते।[२४]

सर्वेषामचामित्सञ्ज्ञावारणार्थं सूत्रे अनुनासिक इति पदं गृहीतम् तस्मात्केवलमनुनासिकायं एवेत्सञ्ज्ञा भवति। काशिकाकारजयादित्यवामनेन उपदेश इति शब्दे उपोपसर्गपूर्वकदिश्धातुना करणार्थे घञ्प्रत्ययो मतः।[२५] अनेनात्रेयं शङ्का भवति यद् **'अकर्त्तरि च कारके सञ्ज्ञायाम्'**[२५] सूत्रेण सञ्ज्ञातःघञ्प्रत्ययस्तु सञ्ज्ञायामस्ति विहितः, प्रकृतसूत्रे उपदेश इति शब्दः सञ्ज्ञा नास्ति तस्मादत्र घञ् न भविष्यति। अस्याः शङ्कायाः समाधानमिदं यत् काशिकायाः पदमञ्जरीटीकायाम् 'अकर्त्तरि च कारके सञ्ज्ञायाम्' सूत्रे चकारं भिन्नक्रमे मत्वा, अस्याधारेऽसञ्ज्ञायामपि घञ् मतः।[२६] व्याकरणमहाभाष्ये **'कृत्यल्युटो बहुलम्'**[२७] सूत्रेण बहुलवचनादसञ्ज्ञायामपि घञ्मत्वा समाधानं कृतम्।[२८] प्रदीपकारकैय्यटेन[२९] काशिकान्यासकारजिनेन्द्रबुद्धिना[३०] चापीदमेव मन्यते। बालमनोरमाकारवासुदेवदीक्षितेन उप इति शब्दम् आदिवाचकं दिश् इति शब्दम् उच्चारणार्थकं मत्वा भावे एव घञ्प्रत्ययो मतः।[३१]

महामुनिः पाणिनिः स्वाष्टाध्यायीग्रन्थेऽनुनासिकाक्षुछ इति चिह्नं लिखितवान्। यथा एधँ वृद्धौ गम्लृँ गतौ इति। एतेषु धातुपाठेष्वनुनासिकस्य

---

२३. प्रत्यक्षं तावदाख्यानमुपदेशः। तद्यथा अगोज्ञाय कश्चिदां सक्थनि कर्णे वा गृहीत्वा उपदिशति 'अयं गौः' इति।–व्याकरणमहाभाष्ये, १/३/२

२४. इन्द्रियगोचरार्थस्य यदाख्यानं स उपदेश इत्यर्थः। –व्याकरणमहाभाष्यप्रदीपे, १/३/२

२५. अष्टाध्याय्याम्, ३/३/१६

२६. अकर्त्तरि चेत्यत्र चकारो भिन्नक्रमः सञ्ज्ञायां चेति तेन क्वचिदसञ्ज्ञायामपि भवति। –काशिकापदमञ्जर्याम्, १/३/२

२७. अष्टाध्याय्याम्, ३/३/११३

२८. एवं तर्हि कृत्यल्युटो बहुलमित्येवमत्र घञ् भविष्यति। –व्याकरणमहाभाष्ये, १/३/२

२९. बहुलग्रहणादसञ्ज्ञायामपि घञ् भविष्यतीत्यर्थः। –व्याकरणमहाभाष्यप्रदीपे, १/३/२

३०. अकर्त्तरि च कारके सञ्ज्ञायामिति करणे घञ्। ननु च सञ्ज्ञायामित्युच्यते, न चेयं सञ्ज्ञा? नैतदस्ति; कृत्यल्युटो बहुलमिति बहुलवचनादसञ्ज्ञायामपि भवतीत्यदोषः। –काशिकान्यासे, १/३/२

३१. उपशब्दा आद्यर्थकः। दिशिरुच्चारणक्रियायाम्। भावे घञिति भावः। –वैयाकरणसिद्धान्तकौमुदीबवालमनोरमाव्याख्यायम्, १/३/२

चिह्नवशादेते अचः पाणिनिना इद्रूपेण लोचिताः किन्तु सम्प्रति स अनुनासिकपाठः परिभ्रष्टः सञ्जातः तस्मात्पाणिनिकथिता वर्णा गुरुपरम्परोपदेशानुसारेणैवानुनासिकधर्मवन्ता बोधनीयाः[३२] तात्पर्यमिदं यदनुनासिकविषये गुरुपरम्पराया आश्रयणमेव समीचीनम्। गुरुपरम्परया यो यो वर्णोऽनुनासिकरूपेणागच्छति तमनुनासिको यश्चानुनासिको न मन्यते तमननुनासिको मन्तव्यः। निष्कर्षोऽयं यत्पाणिन्यादि– त्रिमुनिभिः सङ्केतिताः अनुनासिकस्वरवर्णा इत्सञ्ज्ञका मन्यन्ते ते स्वरवर्णा आदौ स्युः अन्ते वा। मुखसहितनासिकयोच्चारितवर्णोऽनुनासिकः। स्वराणां सामान्यत उच्चारणं निरनुनासिकमेव भवति, अतः सानुनासिकस्वरविषये इदं कथ्यते यत्पाणिनिप्रभृतिभिर्येषां स्वरवर्णानामनुनासिकता यथास्थाने सङ्केतिता स्यात्त एव सानुनासिकस्वरा मन्तव्याः।

उपदेशेऽजनुनासिक इत् 'इति सूत्रेण लण् इति षष्ठमाहेश्वरसूत्रे लकारोत्तराकारस्येत्सञ्ज्ञा भवति यतो गुरुपरम्परया **'लँण्मध्ये त्वित्सञ्ज्ञकः'**[३३] इति प्रवादोऽस्ति तस्मादयमनुनासिक लँण् इत्यस्मिन् रूपेऽस्ति। अनेनान्त्येत्सञ्ज्ञकाकारेण सह **'हयवरट्'**[३४] सूत्रस्य रकारे मिलिते सति र्+अँ=रँ प्रत्याहारो भवति। अस्य रँ प्रत्याहारस्यान्तर्गते रकारलकारौ एतौ द्वौ वर्णौ आगच्छतः। **टकारो हलन्त्यम्'**[३५] सूत्रेणेत्सञ्ज्ञकोऽस्ति अतो मध्यवर्तिभूते सत्यपि तद्ग्रहणं न भवति।

'हलन्त्यम्' सूत्रेणाचार्यपाणिनिरुपदेशावस्थायां विद्यमानान्त्यहल इत्सञ्ज्ञा मतवान्। उपदेशार्थोऽस्त्याद्योच्चारणम।[३६] 'आद्योच्चारणम्' पदे' षष्ठीतत्पुरुषसमासः 'आद्यानामुच्चारणमित्याद्योच्चारणम्'। 'आद्यम्' अर्थात् शिवपाणिनिकात्यायनपतञ्जलीनामुच्चारणम्। उच्चारणमेवेदम् 'उपदेशः'

---

३२. प्रतिज्ञानुनासिक्याः पाणिनीयाः।–काशिकावृत्तौ, १/३/२

३३. लघुसिद्धान्तकौमुद्याम्, माहेश्वरसूत्रवृत्तौ

३४. प्रत्याहारसूत्रम्,५

३५. अष्टाध्यायी, १/३/३

३६. उपदेश आद्योच्चारणम्।–वैयाकरणसिद्धान्तकौमुद्याम्, १/१/७१

कथ्यते। शिवसूत्रपाठगणपाठधातुपाठोणादिपाठलिङ्गानुशासनवार्तिकपाठा–गमप्रत्ययादेशानां गणना उपदेशे क्रियते। सूत्रस्थस्य 'अन्त्यम्' इति शब्दस्यर्थोऽस्त्यन्ते भवम्।[३७] पदमञ्जरीकारानुसारेणात्र अन्तशब्दः समाप्त्यर्थेऽस्ति स्थितः।[३८]

हल् इति पदेन पञ्चममाहेश्वरसूत्रस्य हयवरट् इत्यस्यादिवर्णहकारा–दन्तिमचतुर्दशमाहेश्वरसूत्रस्य हल् इत्यस्यान्तिमवर्णलकारपर्यन्तं समस्तव्यञ्जनानि गृह्यन्ते तस्माद् हलः सामान्यार्थो व्यञ्जनम् इति क्रियते।

प्रकृतसूत्रे केवलमुपदेशावस्थाया अन्त्यहलः इत्सञ्ज्ञा मता। यथा अइउण् इति माहेश्वरसूत्रस्यान्तिमो हल् णकारोऽस्ति तस्मात्तस्येत्सञ्ज्ञा भवति यत्फलं **'तस्य लोपः'**[३९] सूत्रेण तद्वर्णस्य लोपभवनम्। अत्र केवलमुपदेशे विद्यमानानि अन्तिमव्यञ्जनानीत्सञ्ज्ञकानि कथितानि, अतो लोकव्यवहारे वर्तमानव्यञ्जनानामित्सञ्ज्ञा न भवति। यथा अग्निचित्, सोमसुत् प्रभृतिलौकिकप्रयोगेष्वन्तिमव्यञ्जनस्य तकारस्येत्सञ्ज्ञा न भवति।[४०]

प्रत्याहारपाठे हल् इति सूत्रेऽन्तिमलकारस्येत्सञ्ज्ञा प्रकृतसूत्रेण न भवति यतः अत्राऽन्योऽन्याश्रयत्वदोषोऽस्ति। हल् इति सूत्रे हलन्त्यम् इति सूत्रेण लकारस्येत्सञ्ज्ञानन्तरमेव हयवरट् इत्यस्य हकारेण हल् इत्यस्य लकारपर्यन्तं हल्प्रत्याहारो जनिष्यते हल्प्रत्याहारजननस्यानन्तरञ्चैव हलन्त्यम् इत्यनेन हल् इत्यस्येत्सञ्ज्ञा भविष्यति। इत्थमिदमितरेतराश्रयत्वमस्ति। सङ्क्षेपे, इत्सञ्ज्ञाया अनन्तरं प्रत्याहारो जनिष्यते प्रत्याहारस्यानन्तरमित्सञ्ज्ञा भविष्यति इदमेवेतरेतराश्रयत्वमस्ति। अस्यैव समाधानार्थं हलन्त्यम् इत्यस्मिन् हल् द्विवारमुच्चार्यते। प्रथम हलि 'हस्य ल् हल्' सम्बन्धसामान्ये षष्ठीसमासे मते सति अस्यार्थो भविष्यति हकारसमीपवर्ती ल्। अस्य लकारस्येत्सञ्ज्ञा प्रत्याहारमाश्रित्य नापितु साक्षात् नाम आदाय स्वतन्त्ररूपेण क्रियते।

---

३७. अन्ते भवमन्त्यम्। –काशिकावृत्तौ, १/३/३

३८. अन्तशब्दोऽत्र समाप्तौ वर्तते नावयवे असम्भवात् न समीपे अतिप्रसङ्गात्। येन समाप्यते समुदायस्तदन्ते भवमन्त्यं दिगादित्वाद्यत्। –काशिकापदमञ्जर्याम्, १/३/३

३९. अष्टाध्याय्याम्, १/३/९

४०. उपदेश इत्येव अग्निचित् सोमचित्।–काशिकावृत्तौ, १/३/३

लकारस्येत्सञ्ज्ञायां सति अनेन हल्प्रत्याहारो जनिष्यते। तदनन्तरं 'हल च हल च' इत्यवस्थायां **'नपुसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्'**[४१] सूत्रेणैकशेषे कृते सत्यर्थो भविष्यति यद् हकारसमीपवर्त्तिलकारस्येत्सञ्ज्ञा भवति अन्तिमहलश्चेत्सञ्ज्ञा भवति। इत्थमितरेतराश्रयदोषो न वर्तते। पक्षेऽस्मिन् द्वितीयहल् तन्त्रेण मतः। तन्त्रार्थोऽस्ति एकमेव पदमावृत्तिभेदं विनाप्यनेकस्योपकारकभवनम्। यथा सुप्रज्ज्वलितो दीपको नैकछात्राणामुपकारः करोति। अत्र प्रयत्नविशेषाय तन्त्र इति शब्द उद्धृतः। अत्र प्रयत्नविशेषेण द्वितीयहलो गृहीतम्।[४२]

**'न विभक्तौ तुस्माः'**[४३] सूत्रानुसारेण विभक्तिस्थितानामन्त्यतवर्गसकार–मकाराणां हलन्त्यम् सूत्रेणेत्सञ्ज्ञा न भवति यत उपदेशे विभक्तीनां समावेशो नास्ति। यथा रामात् ब्राह्मणास् अपचताम् प्रभृतयः।[४४] इत्सञ्ज्ञावशाद् 'रामात्' प्रभृतिपदेषु तवर्गादिवर्णानां लोपो न भवति। **'विभक्तिश्च'**[४५] सूत्रानुसारेण सुप्तिङो विभक्तिसञ्ज्ञा भवति।

प्रकृतसूत्रे 'विभक्तौ' इति पदोद्धृतकारणमिदं यद् **'अचो यत्'**[४६] **'ऊर्णाया युस'**[४७] **'रुधादिभ्यः श्नम्'**[४८] प्रभृतिसूत्रेषु यत् युस्श्नम् प्रत्यया विभक्तिका न सन्ति अतः त् स् म् इत्येतेषां लोपो न भवति।[४९] अयमित्सञ्ज्ञा–

---

४१. अष्टाध्याय्याम्, १/२/६६

४२. हस्य ल् ललिति द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम्। तेन प्रत्याहारपाठे हल् इत्यत्र लकारस्य इत्सञ्ज्ञा क्रियते। तथा च सति हलन्त्यमित्यत्र प्रत्याहारे नेतरेतराश्रयदोषो भवति।– काशिकवृत्तौ, १/३/३

४३. अष्टाध्याय्याम्, १/३/४

४४. पूर्वेण प्राप्तायामित्सञ्ज्ञायां विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते।–काशिकावृत्तौः, १/३/४

४५. अष्टाध्याय्याम् १/४/१०४

४६. तत्रैव, ३/१/६७

४७. तत्रैव, ५/२/१२३

४८. तत्रैव, ३/१/७८

४९. विभक्ताविति किम्? 'अचो यत्' 'ऊर्णाया युस्' 'रुधादिभ्यः श्नम्'।–काशिकवृस्त्तौः, १/३/४

प्रतिषेधोऽस्त्यनित्यः, अतः 'किमोऽत्'[५०] इटोऽत्[५१] अत्र प्रतिषेधो न भवति। 'इदमस्थमुः'[५२] अत्र उकारानुबन्धवशादेतत्प्रतिषेधस्यानित्यत्वं ज्ञायते।[५३]'

**'आदिर्ञिटुडवः'**[५४] सूत्रविषये काशिकाकारः कथयति यत्समुदायस्य आदौ वर्तमानानां ञिटुडूनामित्सञ्ज्ञा भवति।[५५] भट्टोजिदीक्षितेनोपदेशावस्थायां धातोरादौ विद्यमानानां ञिटुडूनामित्सञ्ज्ञा मन्यते।[५६] प्रकृतसूत्रे आदिशब्दस्य प्रतिञिप्रभृतिभिः सह सम्बन्धोऽस्ति।[५७] सूत्रे आदिपदस्थापनकारणमिदं यत् पटूयति कण्डूयति प्रभृतिस्थलेषु टुडुप्रभृतिशब्दा आदौ स्थिता न सन्ति, अत एषामित्सञ्ज्ञा न भवति।[५८] उपदेशावस्थायाः ञिटुडूनामेवेत्सञ्ज्ञा भवति तस्माद् ञिकारीयति इति पदे ञिकारशब्दः कुत्राप्युपदिष्टो नास्ति, अतोऽस्येत्सञ्ज्ञा न भवति।[५९]

सूत्रपठितेन टु इत्यनेन **'अणुदित्सवर्णस्य चा प्रत्ययः'**[६०] सूत्रानुसारेण टवर्गो ग्रहीतव्यः किन्तु एतादृशो न भवति यतो यद्यदत्र पठितम् टु इत्यक्षरं सम्पूर्णटवर्गस्य जरीगृह्यते तर्हि चुटू इति सूत्रे टुग्रहणस्यावश्यकता नासीत्। अत्र टुग्रहणं टवर्गस्य ग्रहणार्थमेव कृतम्। न्यासकारोऽपीदमेव मन्यते[६१]।

---

५०. अष्टाध्याय्याम्, ५/३/१२

५१. तत्रैव, ३/४/१०६

५२. तत्रैव, ५/३/२४

५३. किमोऽत् इटोऽत् इत्यत्र प्रतिषेधो न भवति अनित्यत्वादस्य प्रतिषेधस्य। इदमस्थमुः इत्युकारानुबन्धनिर्देशादनित्यत्वमुपलक्ष्यते।–काशिकावृत्तौः, १/३/४

५४. अष्टाध्याय्याम्, १/३/५

५५. ञि टु डु इत्येतेषां समुदायानामादितो वर्तमानानामित्सञ्ज्ञा भवति। –काशिकावृत्तौ, १/३/५

५६. उपदेशे धातोराद्या एते एतः स्युः।–वैयाकरणसिद्धान्तकौमुदी, १/३/५

५७. आदिशब्दः प्रत्येकमभिसम्बन्ध्यते।–काशिकावृत्तौ, १/३/५

५८. आदिरिति किम्? पटूयति कण्डूयति। –तत्रैव, १/३/५

५९. उपदेश इत्येव ञिकारीयति।–तत्रैव, १/३/५

६०. अष्टाध्याय्याम्, १/१/६९

६१. अत्र टु–ग्रहणेन अणुदित्सवर्णस्य चा प्रत्ययः इति टवर्गस्य ग्रहणं कस्मान्न भवति? उकारस्यानुनासिकत्वाप्रतिज्ञानात् चुटू इत्यत्र टु ग्रहणाच्च। यद्यत्र टवर्गस्य ग्रहणं स्यात्तदानेनैव प्रत्ययादेरपि सिद्धत्वात् टुग्रहणमनर्थकं स्यात्।– काशिकान्यासे, १/३/५

अत्रैका शङ्केयमपि भवेद् यत् कण्डूयति पटूयति प्रभृत्युदाहरणेषु डूटू इत्यक्षरे दीर्घान्ते स्तः किन्तु **'आदिञ्टुडवः'**[६२] सूत्रे इमे द्वे ह्रस्वान्ते पठिते, अतः प्रकृतसूत्रेणात्रेत्सञ्ज्ञा प्राप्ता एव नास्ति एतदर्थं सूत्रे आदि इत्यस्य ग्रहणकरणस्यावश्यकतैव नास्ति तर्हि अस्य समाधाने न्यासकाराचार्य– जिनेन्द्रबुद्धिना कथ्यते यत् पटुशब्दः पृथ्वादिगणे **'पृथ्वादिभ्य इमनिज्वा'**[६३] सूत्रानुसारेण ह्रस्वान्त एव पठितः तत्पश्चात्प्रक्रियादशयां दीर्घो जायते। न्यासकारानुसारेण कण्डुशब्दोऽपि ह्रस्वान्त एवास्ति यतः कण्ड्वादिशब्दा अपि द्विविधाः सन्ति धातुः प्रातिपदिकञ्च। अनयोर्ह्रस्वान्तकण्डोरेवात्र ग्रहणं न तु दीर्घान्तप्रातिपदिकस्य। यथा कण्डूयति। अत्र कण्डूञ् धातुना **'कण्ड्वादिभ्यो यक्'**[६४] सूत्रेण यवकृत्वा **'अकृत्सार्वधातुकयोदीर्घः'**[६५] सूत्रेण दीर्घे कृते सति कण्डूय इति स्थितिर्जायते। पुनः **'सनाद्यन्ता धातवः'**[६६] सूत्रेण कण्डूय इत्यस्य धातुसञ्ज्ञां कृत्वा तिप् शप् प्रभृतिकृते सति कण्डूयति रूपं निष्पन्नं भवति।[६७]

**'ष प्रत्ययस्य'**[६८] सूत्रानुसारेण प्रत्ययस्यादिषकार इत्सञ्ज्ञको भवति।[६९] षकरोऽयं प्रत्ययस्यादौ स्थितो भवितव्यः उपदेशावस्थायाम्।[७०] यथा नर्त्तकी। अत्र नर्त्तकशब्दे ष्वुन्प्रत्ययस्यादिषकारेत्सञ्ज्ञकादेव **'षिद्गौरादिभ्यश्च'**[७१]

---

६२. अष्टाध्याय्याम्, १/३/५

६३. तत्रैव, ५/१/१२२

६४. तत्रैव, ३/१/२७

६५. तत्रैव, ७/४/२५

६६. तत्रैव, ३/१/३२

६७. कथं पुनरत्रेत्सञ्ज्ञाप्राप्तिः यावता सूत्रे टुडुशब्दौ ह्रस्वान्तानुपात्तौ दीर्घान्ताविमौ? नैतत्। यद्यपि दीर्घत्वे कृते दीर्घान्तावेतौ भक्तस्तथाप्युपदेशे ह्रस्वान्तावेव उपदेश इति चेहानुवर्तते। तत्र पटुशब्दस्य पृथ्वादिपाठाट् टुशब्दस्योपदेशे ह्रस्वान्तता सिद्धा। कण्डुशब्दस्य कण्ड्वादिभ्यो यक् इत्यत्र पाठाद् डु शब्दस्यापि। द्विविधा हि कण्ड्वादयो धातवः प्रातिपदिकानि च। तत्र धातुः कण्डुशब्दो ह्रस्वान्तः। प्रतिपदिकं तु कण्डूशब्दो दीर्घान्तः।–काशिकान्यासे, १/३/५

६८. अष्टाध्याय्याम्, १/३/६

६९. प्रत्ययस्यादिः ष इत्स्यात्। – वैयाकरणसिद्धान्तकौमुद्याम्, १/३/६

७०. षकारः प्रत्ययस्यादिरित्सञ्ज्ञो भवति। – काशिकावृत्तौः, १/३/६

७१. अष्टाध्याय्याम्, ४/१/४१

सूत्रेण स्त्रीत्वे ङीष्प्रत्ययो भवति।

**'चुटू'**[७२] सूत्रेणोपदेशावस्थायां प्रत्ययस्यादिवर्तमानौ चवर्गटवर्गौ इत्सञ्ज्ञकौ भवतः।[७३] यथा 'राम+जस्' अत्र जसादौ जकारश्चवर्गस्यास्ति अतः प्रकृतसूत्रेणेत्सञ्ज्ञा भूत्वा **'तस्य लोपः'**[७४] सूत्रेण तल्लोपो भवति।

**'लशक्वतद्धिते'**[७५] सूत्रानुसारेण प्रत्ययस्यादिस्थिता लकारशकारक–वर्गाः इत्सञ्ज्ञका भवन्ति किन्तु न भवन्ति तद्धितप्रत्ययेषु।[७६] तद्धितप्रत्ययेषु निषेधात्कप्खग्मिन्धशस्लजादिप्रत्ययेष्वित्सञ्ज्ञा न भविष्यति। यथा ब्यूढोरस्कः वाग्ग्मी, लोमशः, चूडालः प्रभृतयः शब्दाः।[७७]

***

७२. तत्रैव, १/३/७

७३. चवर्गटवर्गौ प्रत्ययस्यादौ इत्सञ्ज्ञौ भवतः।–काशिकावृत्तौः, १/३/७

७४. अष्टाध्याय्याम्, १/३/६

७५. तत्रैव, १/३/८

७६. तद्धितवर्जितस्य प्रययस्यादितो वर्तमाना लकारशकारकवर्गा इत्सञ्ज्ञा भवन्ति।–काशिकावृत्तौ, १/३/८

७७. अतद्धित इति किम्? चूडालः। लोमशः। कर्णिका। –तत्रैव, १/३/८

**रस्मितादासः**
मयूरभञ्जम्, उड़ीसा

# वैदिकवाङ्मये वाक्–तत्त्वम्

मानवसमाजाय सृष्टिकर्त्तुः सर्वश्रेष्ठमतुलनीयञ्च दानं भवति वाक्। वाणी भवति वाक्शब्दस्य शब्दान्तरम्। सचराचर–संसारेऽस्मिन् सहस्त्र–कोटि– सङ्ख्यकाः जीवा निवसन्ति परन्तु तेषु मनुष्यः केवलं श्रेष्ठत्वं प्राप्नोति इत्यस्य कारणं भवति वागेव। अस्मिन् जगति नास्ति तादृशी काचित् शक्तिः यास्तु वाक्शक्त्याः परा भवितुमर्हति। वाचा एव मनुष्या भावानां विचाराणां च परस्परमादानप्रदानं कर्तुं शक्नुवन्ति। मानवस्य चिन्ता चेतना च वाचा एव प्रकाश्यते। वाचं विना जगदिदं शून्यमिव प्रतिभाति जीवनमिदं पङ्गु रिवाऽनुभूयते च। संसारस्य सर्वव्यवहारो वागश्रित एव। वाक् न केवलं भावविनिमयस्य प्रकृष्टं सर्वश्रेष्ठं च माध्यमम् अपितु विश्वेऽस्मिन् यत् सत्यं यच्छिवं यत् सुन्दरं तेषां अभिव्यञ्जिका भवति वाक्।

**ऋक्संहितायां वाचो भेदः**

वाचश्चत्वारो भेदाः ऋक्संहितायामित्थं वर्ण्यन्ते यथा–

**चत्वारि वाक् परिमिता पदानि,**
**तानि विदुर्ब्राह्मणा ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति**
**तुरीयं वाचो मनुष्या वदन्ति।।**[१]

अस्मात् ऋङ्मन्त्राद् इदं स्पष्टीभवति यद् वाचश्चत्वारि पदानि सन्ति। तानि पदानि विद्वांसो मनीषिण एव जानन्ति। तेषु पदेषु त्रीणि पदानि गुहायां सन्ति स्पन्दितानि न भवन्ति। चतुर्थं पदं यद् भवति तद् मनुष्या वदन्ति इति। मन्त्रमिदं वाचः परा, पश्यन्ती, मध्यमा, वैखरी इति भेदानपि सङ्केतयति।

---

१. ऋग्वेदे २/३/२२

**ऋक्संहितायां वाक्स्वरुपम्–**

ऋक्संहितायां वागियं वाण्याः देवीरूपेण स्तूयते पुनश्च ब्रह्मोत्पन्ना–एका–महती–शक्तिरूपेणाऽपि वर्ण्यते। ऋक्संहितायाः दशममण्डलस्य पञ्चविंशत्यधिक–एकशततमसूक्तस्य द्रष्ट्री भवति वाक् यास्तु व्रह्मविदुषी आसीत्। सा अम्भृणमहर्षेः कन्या आसीत् अतो वागम्भृणी इत्युच्यते। सूक्तेऽस्मिन् अष्ट–मन्त्राः सन्ति। सर्वेषु मन्त्रेषु वाक् स्वयमेव स्वस्याः स्तुतिं करोति। प्रथमे मन्त्रे वाग् जगत्कारणस्वरूपा, महद्बलोपेता, जगद्धारयित्री, विश्वस्वरुपा चेति ध्वन्यते। यथा,

**अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।**
**अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा।।**[२]

एतदतिरिच्य वाग्देवी जगतः शासिका, पूजनीयेषु देवेषु अग्रगण्या, सर्वज्ञा, सर्वव्यपनशीला, सर्वविचारणक्षमा, सर्वत्र विद्यमाना, धनप्रापयित्री चेति सूक्तस्यास्य मन्त्रैः स्पष्टं प्रतीयते।

**तैतिरीयोपनिषदि वागजिह्वा–सम्बन्धः**

तैत्तिरियोपनिषदः शिक्षावल्याः तृतीयेनुवाके वाचः जिह्वायाश्च च सम्बन्धः स्पष्टतया परिलक्ष्यते। यथा

**''वाक् सन्धिः, जिह्वा सन्धानम्''।**[३]

सन्धिः इत्यस्य शब्दान्तरं भवति संहिता, वर्णानां सामीप्यं संहिता इत्युच्यते। वर्णानाम् एकत्रीकरणेन संयोगेन वा शब्द उत्पद्यते। नूतनशब्दगठनार्थं यदा पूर्वोत्तरवर्णसंयोगः क्रियते तदा 'सन्धिर्भवति'। येन शब्दोच्चारणं–सम्बन्धी–प्रयत्नमाध्यमेन सन्धिः जायते तत् 'सन्धानम्' इत्युच्यते। अत्र वाक् सन्धिः जिह्वा सन्धानमिति उपनिषद्वाक्यमाध्यमेन जिह्वाव्यापारेण या प्राणशक्तिः मानसिकशक्तिवी सङ्केतिता भवति परवर्त्तिकाले व्याकरणदर्शने सा स्फोटरूपेणालोच्यते।

---

२. तत्रैव १०/१२५/१

३. तैत्तिरीयोपनिषदि १/३/५

**ऐतरेयोपनिषदि वाङ्मनसः सम्बन्धः–**

एतेतरोयोपनिषदः शान्तिमन्त्रे वाङ्मनसः सम्बन्धः परिलक्ष्यते। यथा–

**"वाङ् मे मनसि प्रतिष्ठिता, मनो न वाचि प्रतिष्ठितम्।।"**[४]

यदि कश्चन एकस्मिन् समये केवलं वाचा पाठं पठति परन्तु तस्मिन्नेव समये तस्य मनः अपरं किमपि चिन्तयति अथवा मनसि एको भावः तिष्ठति परन्तु वचनेनाऽपरं किमपि प्रकाश्यते। एवं–भूतायां स्थित्यां वाङ्मनसि प्रतिष्ठिता स्थिरा वा भवेत्। पुनश्च मनो वाचि प्रतिष्ठितं स्थिरं वा भवेत्। अतो वाक्मनसोः एकः परिपूरकः सम्बन्धो वर्तत इति ध्वन्यते।

**छान्दोग्योपनिषदि वाचः कलात्मकं स्वरूपम्–**

वाक् स्वयमेका अभिव्यक्तिर्भवति। प्रभावान्विता अभिव्यक्तिः 'कला' इत्यभिधीयते। यदा वाक् सम्वेदनशीला, आह्लादमयी, माधुर्यमयी, सत्त्वोद्रेककारिणी, सौन्दर्यमयी तथा रसान्विता भवति तदा वाचः कलात्मकं रूपं प्रस्फटितं भवति। छान्दोग्योपनिषदः प्रथमेऽध्याये वर्ण्यते–

**"वाच ऋग् रसः, ऋचः सामः रसः साम्न उद्गीथो रसः।"**[५]

वाचो रसो भवति ऋक्। ऋचो रसो भवति साम। साम्नो रसो भवति उद्गीथः। अतः प्रत्यक्षे परोक्षे वा वाग् आह्लादस्य माधुर्यस्य च द्योतिका भवति। वाचः कलात्मकरुपम् आनन्दमयमिति प्रतिभाति।

**बृहदारण्यकोपनिषदि वाचो ज्ञानात्कं स्वरूपम्–**

बृहदारण्यकोपनिषदो द्वितीयेऽध्याये वर्ण्यते यत्–

**"सर्वेषां वेदानां वागेवायतनम्।"**[६]

ऋक्–यजुः–साम–अथर्व–वेदानां ज्ञानं, इतिहास–पुराणादि विद्यानामागमो वाङ्माध्यमेनैव सम्भवति। अतः सर्वेषां ज्ञानानां सर्वासां विद्यानां

४. ऐतरेयोपनिषदि–शान्तिमन्त्रम्

५. छान्दोग्योपनिषदि १/१/२

६. बृहदारण्यकोपनिषदि २/४/११

च एकमात्रमधिष्ठानं वागिति ध्वन्यते। पुनश्च वाग् ब्रह्मत्वेनापि प्रतिपाद्यते। यथा–

**"वाग् वै सम्राट् परमं ब्रह्म।"**[७]

**माण्डूक्योपनिषदि वाचो रहस्यात्मकं स्वरूपम्–**

वाचो रहस्यात्मकस्य रूपस्य निर्देशको भवति प्रणव ओङ्कारो वां। प्रणवो वाचो मूलतत्त्वं भवति। वाचः संपूर्णो वैभवः प्रणवस्य विलासो भवति। य उद्गीथो भवति सः प्रणवः। यः प्रणवः स ओम्। ओम् अक्षरं भवति। 'ओम्' इत्यस्य उपव्याख्यानं भवति सम्पूर्णं जगत्। अर्थात् सम्पूर्णमिदं जगत् ओङ्कारमयं शब्दमयं वा। कालत्रयं व्यतीतं यत् किमपि तत्त्वं वर्तते तद् भवति ओङ्कारतावम् प्रणवतत्त्वं वा। माण्डूक्योपनिषदि वर्ण्यते यत्–

**ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानं**
**भूतं भवद्भविष्यदिति सर्वमोङ्कार एव।**
**यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव।।**[८]

**उपसंहारः–**

वैदिकवाङ्मये वाचो यद् वर्णनं सम्प्राप्यते ततोऽधिकं वर्णयितुं न कोऽपि शक्नोति। वाक् न केवलमेकं जिह्वाव्यापारं परन्तु अन्तरात्मनः आह्वानमिति वक्तुं शक्यते। लोकयात्रायाम् अद्वितीया सहायिका वाक्शक्तिर्हि मानवं प्रकाशयति। वाक्–शक्त्या मानवः सर्वं विजेतुं शक्नोति। संसारेऽस्मिन् धर्माधर्मयोः सत्यासत्ययोः ज्ञानमपि वाचा प्रकाशितं भवति। वाग् भवति एतादृशी शक्तिर्यस्याः यथार्थोपयोगने सर्वमशक्यमपि शक्यं भवितुमर्हति सर्वमपूर्णमपि सम्पूर्णं भवितुं शक्नोति। जगदिदं वाचं विना शून्यम् असम्पूर्णमिवाऽ नभूयते। समग्रस्यास्य विश्वस्य निवन्धनी शक्तिः वागाश्रिता। सर्वं ज्ञानमपि वागनुबिद्धमिव प्रतीयते। लोकेऽस्मिन् नास्ति तादृशः कश्चन यो

---

७. तत्रैव ४/१/२

८. माण्डूक्योपनिषदि १/१

वाचं विना स्वस्याऽनुभवं ज्ञानञ्च प्रमाणत्वेनोपन्यसति। यथा मणयः सूत्रमाध्यमेनाऽनुविद्धा भवन्ति चेतद् हाराकारं स्वरूपं धारयन्ति तथैव सर्वाण्यपि ज्ञानानि वाङ्माध्येन अनुविद्धानि सन्तः प्रकाश्यन्ते। इह जगति वाक्तत्त्वमनुभूय यदि कश्चन स्वस्य वाक्–शक्त्याः यथायोग्यं यथोचितं चोपयोगं करोति तर्हि नूनं साऽभीष्टफलं प्राप्तुमर्हति। अतः सर्वदा वाचः उपासना कर्तव्या अर्थात् वाचः सदुपयोगः करणीयो न तु दुरुपयोगः।

***

**डा० गीता अग्रवालः**
पूर्णिया

# वाल्मीकिरामायणे वर्णित–मिथकबिम्बः

संस्कृतवाङ्मयस्य गगने वाल्मीकिः रविरिव प्रतिभासते। भारतीयसंस्कृतिर्विविधतायामेकताया जीवन्तोऽभिव्यक्तिरस्ति। रामायणमस्ति प्रतिध्वनिः संहितासाहित्यस्य। महाकाव्यस्य प्रथमपदं संस्कृतिमात्मानं प्रतिरूपायितुं शक्नोति। रामायणेऽपि भारतीय–संस्कृतेः स्वरूपं पश्यामो वयम्।

जिज्ञासाविषयोऽस्ति यत् चन्द्र–सूर्य–ग्रह–नक्षत्र–वायु–अग्नि–आकाशादयः कानि सन्ति किमर्थं च सन्ति। अस्य सम्बन्धे सामुदायिकचेतनैः या कल्पना क्रियते तस्य सामूहिकरूपं मानवजातेः मिथकोऽस्ति। जातीयमिथः सृष्टिसम्बन्धी कल्पनयाऽविर्भूतो भवति।

मिथक आदिकालीनः परवृतो वर्तते। काव्यबिम्बोऽयम् आद्यबिम्बस्य तुल्यं मानवजातेः सामूहिकचेतनया एव आविर्भूतो भवति। डॉ० रमेशकुन्तलमेघवर्यः ''चिति की लीला में प्रतीक का कार्य'' शीर्षक निबन्धे अवर्णयद् यत् मिथकस्य वास्तविकं धरातलं चिन्तनस्य न अपितु अनुभूत्या प्रकटयति। विश्वासो न प्रत्युत विश्वासोऽस्य आश्रयो वर्तते। मानवतायाः सामूहिकेतिहासस्य सम्बन्धनात् सामूहिकचेतनायाः शेवधिः प्रतीयते।

मिथकः काव्यात्मकं भाषाऽपि मन्यते। भाषायाः विकासः क्रम–सङ्केतेन शब्द–सङ्केतेन च मिथकीय–रूपकमयी भाषयाभवत्। कैसिर्रवर्यो मिथकेन भाषायाः प्रादुर्भावो न मन्यते। तस्यानुसारेण एतयोः पिता एक एव। एकस्य स्कंधस्य दौ भिन्नौ शाखे स्तः। स्कन्धोऽस्ति अयम् आदिमानवस्य प्रतीकपरकस्य सूत्रीकरणस्य मनोवेगः।[१]

---

१. लैंग्वेज एण्ड मिथ पृ. ८८

कार्लयुगवर्यो मिथं सामूहिकस्याऽचेतनस्य जातीयाचेतनायाश्च सम्मिलितं प्रकाशनं ज्ञापितवान्। शिवबालकरायवर्यानुसारेण मिथक आदिम–जातेरत्मानो निःशेष उद्गारः। सः तं अन्तःप्राणस्य मधुरगुञ्जनं अद्भुतध्वननश्च भावयति। वस्तुतो मिथ आदिम–मनुष्यस्य विवेचना। विचारणा याः काल्पनिकसृष्टिः भवति। धर्मकलादर्शनसंस्कृति–समाजविज्ञानञ्च सर्वमस्मिन् अन्तर्हितम्। वेदे येषां देवानामुल्लेखः प्राप्यते ते पुराणेषु मिथकस्य माध्यमेनोल्लेखिताः।

रामायणेऽपि विविधा मिथकबिम्बाः प्राप्यन्ते। अस्मिन् महाकाव्ये यत्र आधिकारिकः कथा प्राप्यते तत्राधिकारिकस्य इतिवृत्तस्य मध्ये आख्यायिका अपि आयाति।

कैकेयीदशरथयोः संवादे अति लघु परं तु अतिरमणीयं मिथकीय–काव्यबिम्बं निरूपयति महाकविर्वाल्मीकिः। कैकेय्याः वचनं दशरथं प्रति–

**शैव्यः श्यनेकपोतीये स्वमांस–पक्षणे ददौ।**
**अलर्क चक्षुषी दत्त्वा जगाम गतिमुत्तमान्।।**

**सागरः समयं कृत्वा न बेलामतिवर्तते।**
**समयं मानृतं कार्षीः पूर्ववृत्तमनुस्मरन्।।**[२]

राज्ञो दशरथस्य समक्षे कैकेयी नृपस्य शैव्यस्य अलर्कस्य सागरस्य च बिम्बान् प्रस्तैति।

वातापि इल्ववस्य मिथको बिम्बः कौतूहलो मनोरञ्जकश्च प्रतिभाति।

सुरम्य–बिम्बोऽपि सर्वेषां मनांसि आर्कषति। बिम्बोऽयं द्वादशेषु श्लोकेषु वर्तते, येषु अधोलिखितयोः श्लोकयोः भावप्रवणता अद्वितीयाऽस्ति।

**एतौ दृष्ट्वा कृशौ दीनौ सूर्य–रश्मिप्रतापितौ।**
**बध्यमानौ बलीवर्दौ कर्णकेण दुरात्मना।**

---

२. वाल्मीकिरामायणे २/१२/४३–४४

**मम कायात् प्रसूतौ हि दुःखितौ भारपीड़ितौ।**
**यौ दृष्टवा परितप्येऽहं नास्ति पुत्रसमः प्रियः।।**[३]

अत्र अश्रुपूर्णा कामधेनुः भयभीतो देवराज अपि च अचेतनावस्थायां बलीवर्दावेते सर्वे करुणं वातावरणमुत्पादयितुं सक्षमाः भवन्ति। बलीवर्दयोः कष्टं दृष्ट्वा सुरभी रोदिति। वात्सल्याभिभूता सुरभिः अश्रूणि मुञ्चन्ति तानि अश्रूणि इन्द्रस्योपरि पतन्ति न तु दूर्वादले। भयभीत इन्द्रोऽस्य कारणमपृच्छत्। सुरभ्या उत्तरं प्राप्य इन्द्रः परं तोषं प्राप्तवान्।

'सुरभि–इन्द्र–संवादस्य' बिम्बस्य प्रभावेण कैकेय्याः हृदयोऽपि परिवर्तितोऽभवत् सा च कौशल्यां प्रति सदया भवति। स्वापराधं स्वीकरोति। रामं प्रतिनिवर्तयितु वनं प्रति प्रस्थानं करोति।

हनुमतः समुद्रलङ्घनस्य मार्गेऽपि मिथको बिम्बः द्रष्टब्यः–

**पूर्वः कृतयुगे तात पर्वताः पक्षिणोऽभवन्।**
**तेऽपि जग्मुर्दिशः सर्वा गरुड़ा इव वेगिनः।।**

**ततस्तेषु प्रयातेषु देवसङ्घा सहर्षिभि।**
**भूतानि च भयं जग्मुस्तेषां पतनशङ्कया।।**

**ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः।**
**पक्षांचिच्छेद वज्रेण ततः शतसहस्त्रशः।।**

**सः मामुपगतः क्रुद्धो वनमुद्यम्य देवराट्।**
**ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना।।**

**अस्मिंल्लवणतोये च प्रक्षिप्तः प्लवगोत्तमः।**
**गुप्तपक्षां समग्रश्च तव पित्राभिरक्षितः।।**[४]

यदा सज्जनः प्रत्युपकारस्याऽवसरं प्राप्नोति तदा तमवसरं नाशियतुं न वाञ्छति। उपकर्तुं तस्य जीवनस्य एकोऽङ्गो भवति। परं तु कस्यचित्दु–पकारं स्वनिमित्तार्थ, ऋणतुल्यं मनुते। अवसरं प्राप्य प्रत्युपकाराय व्यग्रो

---

३. तत्रैव २१/७४/२३–२४
४. तत्रैव

भवति।

मन्थरायाः उक्तयोऽपि मिथको बिम्बः प्रतीयते–

श्रूयते यद् वनद्रुमाणि विक्रीय स्वजीवनं यापनाय जनः कमपि वृक्षं छेत्तुं विचारयति प्रत्युत् सः वृक्षः गुल्मैः आवृतः आसीत्। अतो कोऽपि छेत्तुं समर्थो न अभवत्।

रामोऽपि तादृश–वृक्षस्य सदृशो यस्य परितः लक्ष्मणो गुल्मस्य सदृशः तिष्ठति। यदि रामेण राज्यं प्राप्यते तदा कोऽपि लक्ष्मणस्य सन्निकटं विद्यमानः रामस्य अपकर्तुं न शक्नोति।

मिथकस्य बिम्बोऽयं यर्थाथं दृश्यं प्रस्तौति। मन्थरायाः दूरदर्शिता सराहनीया परं दुष्टा बुद्धिरयोध्यां नाशितवती।

अत्रिमुनेराश्रमे अनसूया साक्षात् तपोमूर्तिः। ऋषीणां कल्याणार्थं स दुष्करं तपमकरोत्। एकदा दशवर्षाणिपर्यन्तं वर्षा नाऽभवत् तदा सम्पूर्णं जगद् व्लाकुलोऽभवत् तदा अनुसूया देवी एव दुष्करैः नियमैः अलंकृतो भूत्वा स्वतपसः प्रभावेण अत्र कन्दमूलानि उत्पादयत् मन्दाकिन्याश्च पवित्रा धारा प्रावहत्। अपि तु दशसहस्त्राणि वर्षाणि अत्रैव तपं कृत्वा स्वव्रतानां प्रभावेण ऋषीणां समग्राणां विध्नानां निवारणं कृतवती।

सुग्रीवेणाख्यायिता दुन्दुभि–कथाऽपि मनोरञ्जका वर्तते।

सुन्दरकाण्डे अशोकवनिकायाः राक्षसीनाम् वर्णनेष्वपि मिथकीयं वैचित्र्यं परिलक्ष्यते। कबन्ध्ः कनकमृगः, त्रिशिरा, सुरसा, सिंहिंका, स्वयंप्रभायाः गुफा अपि मिथक–बिम्बान् एव प्रकटितवन्तः।

अतिसम्पन्नतायाः सूचकः स्वयंप्रभायाः गुफायां स्वर्णमयाः वृक्षाः, भवनाः मणिजालावृतानि गवाक्षानि अपि विराजन्ते। अस्याः गुफायाः मिथं स्वयंप्रभा वर्णयति यन् मायासुरेण दानवेन मायया इदं काञ्चनं वनं निर्मितम्। अनन्तरं ब्रह्मणा हेमायै हिरण्यमयमिमुत्तमं वनं दत्तम्। स्वयंप्रभा तस्याः भवनस्य रक्षार्थं नियुक्ता।

वाल्मीकेः सूक्ष्मदृष्टिः परोक्षाणि वस्तून्यपि साधारणवदवलोकयति। विलक्षणया प्रतिभयाऽनेकानि योजनानिदूरं गुफायां स्वर्णमयं वनं निर्मितम्।

रामायणस्य मिथकबिम्बा न केवलं पुरा कथारूपेणाऽवलोकनीयाः अपितु ते हृदयावर्जका उपदेशप्रदाः सहजाभव्यञ्जकाश्च वर्तन्ते, येषां व्यावहारिकं रूवरूपमाश्रित्य जनानां दोषपरिष्कारपूर्वकं परमानन्दस्याऽनुभूतिः कर्तुं शक्यते।

***

**डॉ० प्रयागनारायणमिश्रः**
लखनऊ

# भारती–विद्या–वैभवम्

श्वेतपद्मासने शोभमानेव या
सद्धियां प्रेरिका भावना–भाविका।

श्रीमती शारदा ज्ञानदा राजते
धीमतां बोधिका काव्यकान्तालिका।।१।।

सा हरन्ती कृतं वै मया मानसं
कायिकं वाचिकं पापजातं समम्।

मे मनस्थं तमो नाशयन्ती मुहु–र्यातु
काव्ये रते भा–कवित्वङ्करी।।२।।

सर्वलोकोत्तरं भाति विद्याधनं
विद्यया नैव तुल्यं हि कश्चिद्धनम्।

नैव केनाऽपि वा भ्राज्यते तद्धनं
चौरदस्य्वादिभिश्चौर्यते नो धनम्।।३।।

भुक्तिनिद्रे भयं मैथुनं सर्वदा
जायते वै पशूनां यथा मानवे।

अस्ति विद्याऽधिकं केवलं मानुषे
तद्विहीनो जनो हा! पशुत्वं गतः।।४।।

दुष्कुलीनोऽपि विद्वांश्च सम्पूज्यते
गौरवं यति विद्वज्जनः सर्वदा।

विद्यया लभ्यते ऋद्धि–सिद्धिद्वयं
विद्यया वेत्ति वेद्यं हि सर्वं जनः।।५।।

विद्यया ह्यश्नुते मुक्तिकामोऽमृतं
शान्तिकामोऽपि शान्तिं समाजे मुदा।

सा परा शाश्वती वेदवेदान्तगा
कथ्यते योगिभिर्वासनाकर्त्तरी।।६।।

यत् त्रयी दण्डवार्ते तथान्वीक्षिकी
वेदराकेशसङ्ख्या सुविद्यामृता।

नैव मुक्तिप्रदा लोकसाफल्यदा
केवलं सा जगत्सौख्यदा याऽपरा।।७।।

वेदवेदाङ्गशास्त्रादिकं सुन्दरं
धर्मशास्त्रञ्च पौराणिकं वाङ्मयम्।

न्यायजैमिन्यसाङ्ख्यादिकं दर्शनं
धर्मकामार्थमुक्तिप्रदं सर्वथा।।८।।

हन्यते विद्यया पापवीजाङ्कुरो
द्वेषरागादिकः खल्वनर्थङ्करः।

सा जगद्दोषहा शान्तिदा वल्लरी
पुण्यकीर्तिप्रदा श्रीविधात्री सदा।।६।।

शोभते नैव विद्या हि शीलं विना
राजते नैव दर्पान्विता कुत्सिता।

शीलसम्पन्ननम्रान्वितो यो बुधो
विद्यया शोभते देवरूपेण सः।।१०।।

मातृवत् त्रायते भ्रातृवत् सा सदा
या नियुङ्क्ते हिते तातवत् सर्वदा।

मित्रतुल्यं प्रवासे हि विद्याधनं
योगविद्या सदा पाल्यते योगिभिः।।११।।

शिक्षयाऽभ्यासयोगने वै श्रद्धया
सा हि विद्या सदा सिद्धिभूतिप्रदा।
या गुरूणां गुरुर्या परा देवता
राजते कल्पवल्लीव शुभ्रा सदा।।१२।।

या विपत्तौ सखा चौरहार्या न वा
नैव भार–स्वरूपा हि विद्या वरा।

भ्रातृभाज्या न सा राजहार्या न वा
या च सम्मानमत्याशया भूतले।।१३।।

या ददति श्रियं वै प्रसूते यशो
कामधेनुप्रभा सर्वकामप्रदा।

सर्वमान्यो भवत्युत्तमो मानवो
विद्यया शोभते विश्वभूमण्डले।।१४।।

या व्यये वर्धते सञ्चये क्षीयते
नाम विद्या नराणां धनं ह्यक्षयम्।

या स्वयं भूषणं सर्वश्रेष्ठं धनं
सा मुदा वन्दनीया बुधैस्सर्वदा।।१५।।

***

**डॉ० रामेश्वरप्रसादगुप्तः**
दतिया, म०प्र०

# भारतीयसमाजे नारीणां महत्त्वम्

भारतीयमानवसमाजे नारीणां स्थानं सर्वोच्चरूपेण निगदितम्। वैदिककाले नरनारीणां समानशिक्षा आसीत्। ताः सुष्ठुरूपेण शिक्षाधिकारस्तु प्राप्ताः। गोभिलगृह्यसूत्रे द्वितीये प्रपाठके कन्यानाम् उपनयनसंस्कारविषये उल्लेखो वर्तते। तत्र तासां वेदाध्ययनविषये गायत्रीमन्त्रपाठविषयेऽपि सम्यक् सूचना अस्ति। गृहस्थजीवने तासां योग्यता परिगणिता आसीत्। ऋग्वेदे वेद–विज्ञानां ऋषिकाणां नामानि सन्ति। यथा–श्रद्धा, शची, यमी, इन्द्राणी, अदितिः, जुहुर्ब्रह्मजाया, अपाला, आत्रेयी, शश्वती, आङ्गिरसी, लोपामुद्रा, रोमशा, घोषा, उर्वशी, सूर्या, सावित्री, गोधा, वाक्, विश्ववारा, मानधातृ, दक्षिणा, प्राजापत्या, कमिशा, सार्पराज्ञी, सिकता प्रभृतयः।

उत्तर–वैदिकवाङ्मये गार्गी, मैत्रेयी, पथ्या स्वस्ति इति तिस्रो विदुष्यः ख्यातिप्राप्तरूपेणाङ्गीकृताः। संस्कृतवाङ्मये निम्नलिखितरूपेण नारीणां महत्त्वं सङ्कीर्तितम्–

**सुमङ्गलीरियं वधूरिमां समेत पश्यत।**
**सौभाग्यमस्यै दत्त्वा दौर्भाग्यैर्विपरेतन।।**[1]

**पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा।**
**पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः।।**

**यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते, सर्वास्तत्राफलाः क्रियाः।।**[2]

---

१. अथर्ववेदे १४/२/२८
२. मनुस्मृतौ ३/५५–५६

**स्त्रियां तु रोचमानायां, सर्वं तद्रोचते कुलम्।**
**तस्यां त्वरोचमानायां, सर्वमेव न रोचते।।**[३]

**न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।**
**गृहं तु गृहिणीहीनं कान्तारादतिरिच्यते।।**[४]

**जाया गार्हपत्योऽग्निः।**[५] **अयम् आकाशः स्त्रिया पूर्यते।**[६]

**माताभूमिः।**[७] **माता गुरुतरा भूमेः।**[८] **मातृदेवो भव।**[९]

वैदिकसाहित्ये शिक्षा–प्राप्त्याधारेण नारीणां श्रेष्ठं महत्त्वंम् आसीत्। समाजस्य सर्वेषु क्षेत्रेषु तासामुपादेयता तु अपरिहार्या वर्णिता। वैदिकवाङ्मये 'सबला' इति रूपेण नारी प्रदृष्टा। सा तत्र सुवीरा, शूरपत्नी, इन्द्रपत्नीत्यादिभिर्विशेषणैः निर्दिष्टा। वैदिकयज्ञेषु नारीणां सहभागिता अपरिहार्या निगदिता। वैदिकमानवसमाजो यद्यपि पुरुषप्रधानसमाज एव आसीत् तथापि तत्र नारीणां स्थितिः प्रतिष्ठा–पूर्णा निगदिता। वैदिकवाङ्मये नारीणां पर्दाप्रथाविषये एकोऽपि उल्लेखो नास्ति। कन्या स्वपतिवरणविषये स्वतन्त्रा आसीत्। यथोल्लेखो वर्तते–

**''भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित्।**[१०]

वैदिकसाहित्ये सतीप्रथाविषयकः कोऽपि सन्दर्भो नोल्लिखितः। उत्तर–वैदिककालिकसाहित्ये नारीणामवनता स्थितिर्वर्णिता। पुत्री तु 'दुःखप्रदा' इति कथिता। यथा निर्दिष्टं यत्–

---

३. तत्रैव ३/६२
४. पञ्चतन्त्रे ३/१४३
५. ऐतरेयब्राह्मणे ८/२४
६. बृहदारण्यकोपनिषदि १/४/३
७. अथर्ववेदे १२/१/१२
८. महाभारते ४/३१३/७०
९. तैत्तिरीयोपनिषदि, शिक्षावल्याम् ११/२
१०. ऋग्वेदे १०/२७/१२

**"सखा ह जाया कृपणं हि दुहिता**
**ज्योतिर्हि पुत्रः परमे व्योमन्।।"**[११]

उत्तरवैदिककालेऽपि बालिकाभ्यः कृते शिक्षायाः प्रचारप्रसारस्तु आसीदेव। विधवानारीणां पुनर्विवाहोल्लेखः[१२] त्वत्र प्राप्त एव, कन्यायाः विवाहे धनदायमहत्त्वमपि न आसीत्। वैदिकसमाजे उत्तरवैदिकसमाजे च नारीणां प्रतिष्ठा श्लाघनीयैवासीत्।

स्मृतिकाले प्रायः ईसापूर्वं पञ्चशताब्दिपूर्वतो नारीणां सम्मानं न्यूनत्वं प्राप्तम्। कारणमासीत् तासां शिक्षां प्रति असावधानता। तासां तु उपनयनसंस्कारं प्रति उपक्षोभावो ननु प्रदिष्टः। अतो नारीणां वेदाध्ययनपरम्परा विच्छिन्ना जाता। ताभिः पतिसेवायाः प्राधान्यं निरूपितम्। यथा–

**वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।**
**पतिसेवागुरौ वासो, गृहार्थोऽग्निपरिक्रिया।।**[१३]

अस्मिन् समये विरलरूपेण नारीणां ज्ञानग्रहणं प्रचलितमासीदेव। कतिपया बौद्धभिक्षुण्यो जैनसाध्वीकन्याश्च उदाहरणरूपेण सन्ति एव। किन्तु स्त्रीणामपकर्षसमयः स्मृतिकालो ननु सुस्पष्टः।

स्मृतिग्रन्थेषु नारीणां शिक्षाविषये तु औदासीन्यं स्पष्टमस्ति। पुनश्च कन्याया विवाहविषये प्रायः अष्टवर्षस्य आयुः निर्धारिता। यथोल्लिखितम्–

**"अष्ट वर्षा भवेद् गौरी, नववर्षा च रोहिणी।**
**दशवर्षा भवेत् कन्या, तदूर्ध्वं रजस्वला।**

**माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च।**
**त्रयस्ते नरकं यान्ति, दृष्ट्वा कन्यां रजस्वलाम्"**[१४]

---

११. ऐतरेयब्राह्मणे ७/१८
१२. अथर्ववेदे ६/५/२१–२८
१३. मनुस्मृतौ २/६७
१४. पाराशरस्मृतौ ७/६–७

अस्मिन् कालेऽपि पर्दाप्रथायाः प्रचलनम् अभवत्। अस्तु, नारीणामपकर्षाय त्रिकारणानि उपर्युक्तन्येव सन्ति।

महाकाव्यकाले रामायणस्य महाभारतस्य वा रचनासमये नारीणां प्रतिष्ठा प्रपतिता। तासां स्वातन्त्र्यं छिन्नम्। सती–प्रथां प्रति समर्थनं ननु अभवत्। तासां शिक्षा–अधिकारश्च क्षिन्नः। स्मृतिग्रन्थेषु महाकाव्येषु च नारिजनाः प्रायः पराधीनाः परिलक्षिताः। तथापि महाकवि–कालिदासस्य समये विद्योत्तमा, शङ्कराचार्यस्य समये विदुषी शारदा, राज्ञः अच्युतरायस्य विदुषीपत्नी तिरुमलाम्बा स्वविद्या–व्यसनेन अखिलभारतीयसमाजे प्रतिष्ठताः तु आसन् किन्तु स्वप्रातिभ्यकारणादेतास्तु अङ्गुल्यां गणिताः सन्ति।

मध्यकाले अशिक्षा–कारणाद् भारतीयसमाजे स्त्रीणां शोचनीया दयनीया च स्थितिः आसीदेव।

इयं बिडम्बना एवास्ति, यन् मानव–समाजस्य बहुमूल्यधर्मभागः पुरुषस्य–अर्धाङ्गरूपेण प्रतिष्ठितं परमसौन्दर्यरूपं स्त्रीरत्नं मानवसमाजेन पुरुषसमाजेन वा तिरस्कृतम्। धिक्कारयोग्यं पदमिदमस्ति।

वर्तमानभारतीयः पुरुषसमाजो नारीणां महत्त्वं प्रति सचेतो दरीदृश्यते किन्तु मैथिलीशरणगुप्तो जयशंकरप्रसादः पन्तमहाकवि–प्रभृतयः श्रेष्ठकवयः नारीणाम् उत्पीडनं यदा निरूपयन्ति, तदा नारीसमाजस्य अवमाननाहीनता वा स्पष्टं भवति। नारीणां शोचनीयवर्णनं मर्मभेदं करोति।

स्वातन्त्र्योत्तरकालतः पुरुषसमाजस्य इव नारीसमाजः समानाधिकारः प्राप्तः। भारतीयसंविधानमस्य प्रमाणम् अस्ति। समानाधिकार–प्राप्ताः सरोजनीनायडू, इन्दिरागाँधी, ममताबनर्जी प्रभृतयः शिक्षोपेताः नार्यः तु उच्चपदासीनाः सुकीर्तिलब्धा, इति। भारतीयकोविदैः तासां सम्मानं कृतम्।

निष्कर्षतो भारतीयमानवसमाजे नारीणां भूमिका महत्त्वपूर्णमस्ति। यथा चक्रेण–एकेन वाहनं सुचारुतया न चलति, तथैव नारीणां सम्मानं विना समाजस्य समुत्कर्षस्त्वसम्भव एव। अस्तु, भारतीयसमाजे नारीणां महत्त्वम् अद्वितीयमस्ति।

***

**डॉ० अंशुमान्–शुक्लः**
हरदोई

# छन्दः पादौ तु वेदस्य

वेदाङ्गानां मध्ये छन्दसां महत्त्वं सर्वविदितमस्ति। छन्दश्शब्दविचार मधिकृत्य सिद्धान्तद्वयं प्रसिद्धमस्ति। प्रथमो निरुक्तकारस्य यास्कस्य प्रख्यात–सिद्धान्तः। आचार्यप्रवरेणायास्केन कृता व्युत्पत्तिरस्ति ''छाद्यते छन्दते'' वा अनेन इति। छन्दांसि छादना द्वा।[1] द्वितीयश्च वैयाकरण–सिद्धान्तः। वैयाकरणैः ''चन्द्यते अनेन'' इति व्युत्पत्तिः कृता।

अनयोर्द्धयोः सिद्धान्तयोः शब्दगतप्रकृतिवैशिष्टयमेव मूलकारणमस्ति। अपौरुषेयशब्दराशिमधिकृत्य श्रीमता निरुक्तकारेण सुतरां स्वसिद्धान्तं प्रतिपादितम्। परञ्च वैयाकरणाः लौकिक–मान्यतानुरूपं लौकिकशब्द–संघातमधिकृत्य कुशलतापूर्वकं निर्वचनं कृतवन्तः।

अत्र साक्षात् श्रुतिरुपदिशति **''यदस्मा अच्छदयंस्तस्माच्छंदासि''**[2]

अर्थात्– येन आच्छाद्यते तच्छन्दः। **''छन्दांसि छन्दयन्तीति''**[3]

अर्थात्– येन अक्षराराां परिमाणं गण्यते तच्छन्दः।

विभन्निानां भावानां प्रकाशनं सुश्राव्यपद्धत्या छन्दोभिः सम्पद्यते।

श्रुतिमाधुर्यकारणादेव छन्दांसि आह्लादकानि अह्लादमुत्पादयन्ति।

यथोक्तम्–

**स्वच्छन्दः सञ्ज्ञारघटामात्राक्षरसमोदिता।**
**पादद्वन्दसमाकीर्णा सुश्रव्या सैव पद्धतिः।।**[4]

---

१. निरुक्ते ६/३/१२
२. शतपथब्राह्मणे ८/२/१
३. सर्वानुक्रमण्याम् २/६
४. छन्दोऽनुशासने १/२४

नाट्यशास्त्रकारणोक्तम्– **''छन्दहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम्।**[५]

तात्पर्यमिदं यच्छन्दरहितः कोऽपि शब्दो भवितुं नार्हति। ''चन्दति ह्लादं करोति दीप्यते वा श्रव्यतया इतिच्छन्दः।[६]

## छन्दसां विभाजनम्

आचार्यैः छन्दसां विभाजनं द्विविधं कृतम्। वैदिकंलौकिकञ्चेति यथोच्यते–

'छन्दसामार्षं लौकिकं च'। ऋक् प्रतिशाख्ये प्रजापतेर्देवानामसुराणां च अतिच्छन्द पुरस्सरानिं सप्त छन्दांसि प्रोक्तानि।[७]

अतो वैदिकछन्दसि सप्तछन्दांसि चतुर्दश अतिच्छन्दांसि अन्यतमानि गण्यन्ते।

गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तः, त्रिष्टुप्, जगतीति सन्ति मुख्य–वैदिक–छन्दांसि। अतिच्छन्दांसि चाऽधोलिखितानि सन्ति–

१. अतिजगती २. शक्वरी ३. अतिशक्वरी ४. अष्टिः ५. अत्यष्टिः ६. धृतिः

७. अतिधृतिः ८. कृतिः ९. प्रकृतिः १०. आकृतिः ११. विकृतिः १२. संकृतिः

१३. अभिकृतिः १४. उत्कृतिः।

## आधिदैविकस्वरूपम्

ब्रह्मणः सर्जनात्मिका शत्तिर्बहिर्जगति निस्सरति। पुनः सा शक्तिः बहितः प्रत्यावर्तनं करोति।

वेदज्ञान–सन्दर्भे छन्दशास्त्रस्य महत्त्वमङ्गीकृत्य पाणिनिशक्षायां प्रोक्तम् **'छन्दः पादौ तु वेदस्य'** यथा पादाभ्यां विना पदात् पदमपि चलितुं न शक्यते तथैव छन्दो विना वेदार्थज्ञानमसम्भवम्। कुत्रचिच्च छन्दसां यति–विरामादि–

---

५. नाट्यशास्त्रे १४/४५

६. छन्दोविवृतौ २/१

७. ऋक्प्रातिशाख्ये १६/१

चिह्नानां विपर्यादर्थस्यानर्थो जायते। न केवलं वेदेष्वेव प्रत्युल्लौकिकभाषायामपि विरामादि विपर्यार्थेऽनर्थो जायते यथा पूर्वोक्तं मया छन्दांसि छादनादित्युक्तं निरुक्ते, व्याकरणे पुनः आह्लादार्थक–चदि–धातोः 'चदेरादेशश्चछ' इत्यौणादिक–सूत्रेण छ प्रत्ययेन निष्पन्ने छन्दसान मन्त्रार्थः आह्लादकः आनन्दमय उपलभ्यते (Cause of Pleasant pleasure) आनन्दो यत् ऐहिक–आमुष्मिक उभयविधः ततः कोऽपि विघटना, विपर्ययो विघ्नो नास्ति। छन्दसां महत्त्वमेवमप्यु द्घाट्यते–

**अविदित्वा ऋषिच्छन्दो दैवतं योगमेव च।**
**यो अध्यापयेज्जपेद्वापि पापीयान् जायते तु सः।।**[९]

विश्वमिदं सकलस्वरूपे छन्दसां विवर्तनमस्ति। सर्वेषां मूलछन्दसां देवतानिर्देशमपि अपौरुषेयवचोभिः समुपदिष्टम्–

**अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं वभूव।**
**अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत्।**
**विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अहः।**
**विश्वान्देवाञ्जगत्या विवेश तेन चाक्लप्र ऋषयो मनुष्याः।।**[१०]

अनयोर्मन्त्रयोः प्रधानत्वेन छन्दसाम् आधिदैविकत्त्वमेव वर्णितं यतोहि कथमिति आधिदैविके जगति गायत्र्यादीनि सप्तछन्दांसि सूर्यदेवस्य सप्तविधरश्मयः सन्ति। अग्निसविताप्रभृतीनि यानि नामानि श्रूयन्ते अस्मिन् विश्वे तानि सूर्यदेवतायाः विभिन्नावस्थासु नामानि सन्ति याभ्यो रश्मयः प्रादुर्भूता भवन्ति।

वाचिकछन्दांसि आधिदैविकछन्दसां अनुकरणमात्रमेव इति सत्यम्। आधिकदैविके जगति छन्दोभ्यः छन्दसामुत्पत्तिर्जायते।

### छन्दशास्त्रस्याध्यात्मिक–स्वरूपम्

छन्दसामाध्यात्मिक–स्वरूपमपि सुतरां सुशोभितम्। अध्यात्मदृशापि

---

८. पाणिनीयशिक्षायाम्–४१
९. सर्वानुक्रमण्याम् १/१
१०. ऋग्वेदे १०/१३०/४५

वाचिक–छन्दसामुत्पत्तेः कारणमिनद्रः अर्थात् जीवात्मा वर्तते। अयं जीवात्मा प्रारब्धप्रभावेन सर्वथा बद्धाः सर्वान् अर्थान् मनो नियोजयति।

**उक्तञ्च पाणिनीय–शिक्षायां आत्मबुद्धया समेत्यार्थान् मनो युङ्क्ते विवक्षया।**[११]

अनेन प्रकारेण चिन्मनो निस्सृता वाणी एव छन्दो नाम लोकेऽस्मिन्नेव संसारे छन्दो नाम्ना अभिधीयते। छन्दसां सहाय्येनैव सृष्टियज्ञस्याऽनुष्ठापनं भवति। यथोक्तम्–

''सहच्छन्दस आवृतः।'' मात्रा, यतिस्तथा पादनियमानां फलस्वरूपात् छन्दोभिः श्रुतिसुखदा आनन्दानुभूतिर्जायते। नादब्राह्मणः साक्षात्कारस्य कारणं छन्दांसि एव सन्ति।

**छन्दसामाधिभौतिकस्वरूपं–**

''अपमृत्युं वारयितुमाच्छादयतीति छन्दः'' अर्थात्– अकाल–मृत्युः अपमृत्युः वा वारणाय यदाच्छादनं करोति तच्छन्दः इति आचार्यप्रवरेण सायणमहोदयेन प्रत्यपादि। अस्याभिप्रायो वर्तते यत् कमपि अपमृत्युना रक्षणाय शब्दैः आवृत्तयति तच्छन्दः (ॐ हौं जूँ सः इत्यादि को रूपेण) अत्र कोऽपि विचिकित्सा नास्ति यत् कथ्यते शरीरत्यागानन्तरमपि तेषां कृतिः अमरत्वं प्रयच्छति।

**यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत।**
**यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः।।**[१२]

छन्दस्तत्त्वस्य रहस्यज्ञानेनाऽमृतत्त्वं प्राप्यते। यो मानवो गायत्र्यमन्तरिक्षे त्रैष्टुभं द्युलोके जगतीन्दसां प्रतिपादकः प्रतिष्ठापकः कः? इति ज्ञायेत, तर्हि स देवत्वं प्राप्नोति, अस्यां भुवि भुवने अत्र कोऽपि सन्देहावसरो नास्ति। परञ्च कोऽपि न वर्तते जगतीतले यत् समग्रां सम्पूर्णां छन्दो विद्यां छन्दविधानं वा ज्ञातुं समर्थः पूर्णरूपेण भवितुं शक्नोति। अतएव ऋषिरुवाच–

११. पाणिनीयशिक्षायाम् ६

१२. ऋग्वेदे १/१६४२३

**कश्छन्दसां योगमा वेद धीरः को धिष्णया प्रति वाचं पपाद।**

**कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित्।।**[१३]

**सृष्टिविज्ञाने छन्दत्वं छान्दत्वम्–**

वैदिकच्छन्दांसि सृष्टिविज्ञानस्य सूत्ररूपाणि सन्ति। प्राणसृष्टिः गायत्री छन्दसः ऋचां समुपस्थिताः समुदायेभ्यः सामवेदस्य्य त्रेष्टुभाद् यजुर्वाक्यानामेव एवं छन्दोमयीं दिव्यां वाग् वाणीं वा ससृजत्–

**गायत्रेण प्रति मिमीते अर्कमर्केण त्रैष्टुभेन वाकम्।**

**वाकेन वाकं द्विपदा चतुष्पदाऽक्षरेणा मिमते सप्त वाणीः।।**[१४]

प्रजापतिः सूर्येण द्युलोके जलं स्थापयति। तज्जलं वृष्ट्या पृथिव्यां वर्षति। तदा सूर्यद्युलोकयोः सन्निहित–प्राणो जलवृष्ट्या पृथिव्यां समागच्छति। तत्र गायत्री छन्दसः त्रयः पादाः अग्नि–विद्युत् सूर्यरूपैः (पृथिवी, द्युलोकः–अन्तरिक्षलोकाः) विद्यन्ते। एवमेव ब्रह्मणाज्ञानुरूपं प्रजापतिः अयं सृष्टिनिर्माणे क्षमः भवति।

छन्दांसि छादनात् इत्यमुमुभयार्थं पोषयितुं दुर्गाचार्येणामिहितं सारभूतम् सारगर्भितं वा उद्घोषं (न तु सामान्यकथनं) द्रष्टब्यम्– **''यदेभिरात्मानमाच्छादयन् देवा मृत्युर्बिभ्यतः तच्छन्दसां छन्दस्त्वम्।''**[१५]

अतो निष्कर्षरूपेणेदं वक्तुं शक्यते यत्– छन्दांसि एव वेदपुरुषस्य गतिकारकपादाङ्गरूपेण विद्यन्ते। छन्दसाम् आधिदैविकम् आध्यात्मिक माधिभौतिकञ्चेति मानदण्डमधिकृत्य वैदिकज्ञानविज्ञानेषु वैदिक–दर्शनस्य परिधिं निर्धारयितुं शक्यते अत्र कोऽपि विसंवादः सन्देहस्याऽवसरो नास्ति।

***

---

१३. तत्रैव १/११४/६

१४. तत्रैव १/१६४/२४

१५. निरुक्ते ६/३/१२ दुर्गाचार्यवृत्तिः

**डॉ० जयश्री–चट्टोपाध्यायः**

कोलकाता

# वेदेषु विष्णुः

संस्कृतवाङ्मये भगवान् विष्णोरनन्यसामान्येन महिम्ना विराजते। शतशोऽथ सहस्राणि रूपाणि तस्य। अयमनन्तरूपोऽनन्तशक्तिश्च–

**'अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्।**
**अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।।**

**दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।**
**सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्।।''**[1]

मत्स्यादिदशावताररूपेणायमवतरति। सत्त्वगुणेनायं सृष्टिं पालयति, पूर्णे कालेऽयमेव प्रलयङ्करः संहरति यदाह गीतायाम्–

**'कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः'**[2]

गीतस्याभ्यहितत्वाद् गीतमयसामवेदरूपेणायमात्मानं परिचाययति श्रीमद्भगवद्गीतायाम्–

**'वेदानां सामवेदोऽस्मि**[3]। ऋग्वेदे विष्णुर्देवरूपेण स्तूयते। परमयमत्र इन्द्राग्निसदृशो न प्रतिभाति। नायं विष्णुरत्र देवोत्तमः प्रतिभाति। ऋग्वेदे इन्द्राग्निवायुसूर्यादिदेवानां यादृशी महिमा दरीदृश्यते विष्णोस्तथा स्तुतिर्नास्ति। ऋग्वेदे सर्वाग्रगण्य इन्द्रस्ततः परमग्निः। उक्तं च 'मण्डलादिष्वाग्नेयमैन्द्रात्'। मण्डलादौ यावदिन्द्रसूक्तं नायाति तावदेव अष्टममण्डलस्य प्रथमसूक्तात् प्राक् सर्वत्र अग्निसूक्तं मण्डलादौ विराजितं

---

१. भगद्गीतायाम् ११/१०–११

२. तत्रैव ११/३२

३ तत्रैव ११/२२

सदग्नेरुत्कर्षमुद्घोषयति। ऋग्वेदे द्विशतसङ्ख्याकं सुक्तमग्निमुद्दिश्य निवेदितं सार्धद्विशतसङ्ख्यक–सूक्तमिन्द्रं स्तौति। सूक्तसङ्ख्यया विचार्यते चेद् विष्णुस्तु ऋग्वेदे नगण्य एव प्रतिभातिं सूक्तसंख्यया विचारेण स्तुतेरतिशय्यविरहाद् ऋग्वेदे देवेषु विष्णोश्चतुर्थश्रेण्यामधिष्ठानं पण्डितप्रवरो म्याक्डोनेल्महोदयोऽनुमन्यते। अयमवतारवरिष्ठो न तथा स्तूयमानो वेदेषूलभ्यते। तथापि वैष्णवसाहित्यस्य यदि तावदुत्सानुसन्धानं क्रियते ऋग्वेद एवास्माकं शरणम्। **'आदित्यानामहं विष्णु'** रित्याह[४] गीतायां भगवान् वेदे तु स्वयमादित्यरूपेण त्रिभुवनं व्याप्नोति देवः। प्रथममण्डलस्य द्वाविंशतिसूक्ते अश्विप्रभृतिदेवैः काण्वमेधातिथिर्गायत्रीच्छन्दसा विष्णुमेवं स्तौति–

गायत्र्यादिभिः सप्तछन्दोभिः सप्तकिरणैर्वा परमेश्वरो विष्णुर्यस्माद्भूप्रदेशात् परिचक्राम तस्मादेव स्थानाद्देवा अस्मान् अवन्तु–

**'अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।**
**पृथिव्याः सप्त धामभिः'।।**[५]

यदिदं किञ्च तद्विक्रमते विष्णुस्त्रिधा पदं निधते सः। तत्पदरजसा जगदावृतम्–

**'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं।**
**समूल्हमस्य पांसुरे'।।**[६]

'न मन्त्राणां जामितास्ति'– श्रोतृसंस्कारदार्ढ्याय एष एव अर्थः पुनरुच्यते वेदे। उतथ्यपुत्रो दीर्घतमा ऋषिरपि पुनः पुनः विष्णोस्त्रिपादविक्षेपं त्रिष्टुप्छन्दसा प्रस्तौति

**'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि।**
**यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः।।**[७]

व्यपनशीलस्य विष्णोर्वीरकर्माणि प्रब्रवीमि यो पृथिव्यादिलोकान् निर्ममे

---

४. ऋग्वेदे १/२२/१६
५. तत्रैव ११/२६
६. तत्रैव १/२२/१७
७. तत्रैव १/१५४/१

किं च स्वसृष्टान् लोकान् त्रिधायं क्रममाण आसीत्। तस्य त्रिषु विक्रमेषु भुवनानि अधिष्ठितानि। अतो भङ्ककरं हिंस्रमारण्यकं गिरिचरं श्वापदमिव जनास्तं स्तुवन्ति पराक्रमातिशयात्–

**'प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।**
**यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा'।।**[८]

सर्वद्रष्टुर्विष्णोः पदद्वयं भक्तजनैरधिगन्तुं शक्यते, तस्य तृतीयं क्रमणं चिरदुरवापं, न केवलं नरमात्रैः पक्षिभिरपि। गरुडादयो वायवोऽपि नैतदाप्तुं प्रभवन्ति–

**'द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति।**
**तृतीयमस्य नकिरा दधर्षति वयश्यन पतयन्तः पतत्रिणः'**[९]

महानुभावस्य शत्रुहीनस्य विष्णोः पौरुषं वयं स्तुमो यश्च त्रिधा पदक्रमेण अन्तरिक्षादि–लोकान् स्वेन महिम्ना परिचक्राम–विष्णोरमोघप्रभावं परिकीर्तयन् प्राह ऋषिर्दीर्घतमाः।

विष्णोरयं त्रिपादविक्रमः पण्डितानां सुचिरं चर्चाविषयः। ऋग्वेदे विष्णुः सूर्यस्वरूपस्य तस्य त्रिपादविक्षेपेण सूर्यस्य उदयकालीनावस्थानं, मध्याह्नगगने विहारः, अस्तोन्मुखीनता च सूच्यन्ते।

विष्णोरिमं त्रिपादविक्रममधिकृत्य निरुक्तकाराणामपि समीक्षा सायणभाष्ये उपनिबद्धा–

**'यदिदं किं च तद् विक्रमते विष्णुपदे, गयशिरसीत्यौर्णवाभः'**। कालान्तरे वेदोद्गता विष्णोस्त्रिपादकल्पना वामनावताररूपेणास्य मनोज्ञमुखाख्यानमुद्भावयति पुराणादौ। दशावताराणामेकस्तु वामनः। दैत्यराजं वलिं दमयितुं कश्यपमुनेः पुत्रो वामनरूपेणावतीर्णो विष्णुर्दानशीलाद् वलेः त्रिपादभूमिं प्रार्थयामास। मूढो वलिस्तस्य प्रार्थनां पूरयामास। ततो वामनो विपुलाकृतिर्भूत्वा पादद्वयेन द्या वा पृथिव्यौ परिव्याप्य उदरोद्गतं तृतीयं पदं कुतः रक्षितव्यमिति वलिं पप्रच्छ। विमूढो वलिः स्वमस्तके रक्षणाय तमनुरुरोध।

---

८. तत्रैव १/१५४/२

९. तत्रैव १/१५४/५

ततः परं स्वपदभरेण विष्णुस्तं वलिराजं पातालं प्रेषयामास। श्लोकेनैकेन कान्तकोमलपदावलिकारो जयदेवः उत्तमोत्तमं रूपं वर्णयति वामनावतारस्य–

**'छलयसि विक्रमणे वलिमद्भुतवामनः**
**पदनखनीरज– नितजनपावनः।**

**केशवधृतो वामनरूपजय जगदीश हरे'।।**[१०]

मेघमेदुरम्बरे घनवर्षासु विष्णुपदे वामनावतारस्य विशालां कृष्णपदच्छायां दर्शयामास कालिदासः–

**'प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्**
**हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्।**
**तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी**
**श्यामः पादो वलिनियमनायाभ्युद्यतस्येव विष्णोः'।।**[११]

इन्द्रादिदेवानां पार्श्वे यद्यपि भगवान् विष्णुर्हतप्रभोऽस्ति वेदे तथापि वामनावतारस्य उत्सरूपेणैवं ऋग्वेदगतो विष्णोस्त्रिपादविक्रमो विष्णोर्महिम्ना स्वानुभावं सञ्चारयति। ऋषिर्दीर्घतमा यथा इन्द्रस्य तथैव विष्णोः कृते सोमरस्य प्रस्तुतकरणाय अध्वर्युगणानाह्वयति यतो द्वावपि तौ देवौ दुर्धर्षौ महीयांसौ च। द्वावपि तौ मेघेन सञ्चारमाणौ यथाश्वेन स्वच्छन्द्येन विहरन्तौ स्तः–

**'प्र वः पांतमंधसो धियायते महे शूराय विष्णवे चार्चत।**
**या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना।।**[१२]

अश्वेन यथा जनोऽभिमतं प्रदेशं गच्छति तथैवैतौ स्वाभिमतं देशं यथेच्छं मेघमारुह्य चंक्रमेते। गरुडवाहनो विष्णुर्वेदे इन्द्रसाहचर्यात् मेघवाहनो भवति

---

१०. गीतगोविन्दे
११. पूर्वमेघे–६०
१२. ऋग्वेदे १/१५५/१

किंच सोमपायी प्रतिपद्यते। ऋषिस्तस्य पौरुषं प्रस्तौति, वेदेऽपि विष्णुः पालकः, सर्वस्य स्वामी, नित्ययौवनसम्पन्नश्चिरतरुणः कश्चिद्देवः सदा शत्रुहीनः–

**'तत्तदिदस्य पौंस्यं गृणीमसीनस्य चातुरवृकस्य मील्हुषः।**
**यः पार्थिवानि त्रिभिरिद्विगामभिरुरुक्रमिष्ठोरुगायाय जीवसे'।।**[१३]

विष्णोः पालनात्मकानां कर्मणां दर्शनाय ऋत्विजः ऋषिणा काण्वमेधातिथिना आहूयन्ते यस्य च विष्णोरनुग्रहेण यजमाना अग्निहोत्रादीनि व्रतानि सुचारुरूपेण निष्पादयन्ति स एव च इन्द्रस्यानुकूलः सुयोग्यः सखा–

**'विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।**
**इन्द्रस्य युज्य सखा'।।**[१४]

यद्यप्ययमृग्वेदे विष्णुरिन्द्रस्याभिमतः सखा, समप्राणत्वमनयोः स्वीक्रियते येन 'समप्राणः सखा मतस्तथापि भागवतपुराणेऽनयोः वैरिता अस्मान् विस्मापयते। नन्दराजो यदा इन्द्रानुरागेण परम्परागतधर्माचरणाय जलफलशस्यादिलाभाय तमेव त्रिवर्गसाधनहेतुं मत्वा परमश्रद्धया उपातिष्ठत प्राह च–

**'स एवं विसृजेद्धर्मं पारम्पर्यागतं नरः।**
**कामाल्लोभाद् भयाद् द्वेषाद् स वै नाप्नोति शोभनम'।।**[१५]

तदा श्री भगवानुवाच–

**'कर्मणा जायते जन्तुः कर्मणैव विलीयते।**
**सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते'।।**[१६]

इन्द्रपूजायाः समानीतोपचारेण कृष्णरूपी विष्णुस्तत्र इन्द्रदर्पनाशाय

---

१३. तत्रैव १/१५५/४
१४. तत्रैव १/२२/२६
१५. श्रीमद्भागवतपुराणे १०/२४/११
१६. तत्रैव १०/२४/१३

गोब्राह्मणगोवर्धनपर्वतानां यजनं कारयामास–

**'तस्माद् गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः।**
**य इन्द्रयागसम्भारास्तैरयं साध्यतां मखः'।।**[१७]

नन्दराजादिभिस्तद्वचनमभिनन्दितम्–

**'कालात्मना भगवता शत्रुदर्पं जिघांसता।**
**प्रोक्तं निशम्य नन्दाद्याः साध्वगृह्णन्त तद्वचः।।**[१८]

इन्द्रोऽपि महाक्रोधेनात्मावहेलनं दृष्ट्वा सांवर्तकं मेघं प्लावनाय व्रजं प्रेषयामास–

**'एषां श्रियावलिप्तानां कृष्णेनाध्मायितात्मनाम्।**
**धुनुत श्रीमदस्तम्भं पशून् नयत सङ्क्षयम्'।।**[१९]

अतः परं–

**'स्थूणास्थूला वर्षधारा मुञ्चत्स्वभेष्वभक्ष्णशः।**
**जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतम्।।'**[२०]

ततः परं सर्वेषां सुरक्षायै कृष्णावतारो विष्णुर्गोवर्धनं पर्वतं हस्तेन दधार–

**'दधार लीलया कृष्णश्छत्राकमिव बालकः'।।**
**'अथाह भगवान् गोपान् हेऽरम्ब तात व्रजौकसः।**
**यथोपजोषं विशत गिरिगर्तं सगोधनाः'।।**[२१]

विष्णुरेव ऋतस्य यज्ञस्य गर्भभूतो यज्ञात्मना स उत्पन्नः सायणाचार्यस्येयं व्याख्या प्रथममण्डलगतशतोत्तरषट्पञ्चाशतसूक्तस्य तृतीयस्य मन्त्रस्य व्याख्यायामुपलभ्यते यतो 'यज्ञो वै विष्णु' रुच्यते

---

१७. श्रीमद्भागवतपुराणे १० / २४ / २५
१८. तत्रैव १० / २४ / ३१
१९. तत्रैव १० / २५ / ६
२०. तत्रैव १० / २५ / १०
२१. तत्रैव १० / २५ / १९–२०

शतपथब्राह्मणे। यज्ञभूतस्य सर्वात्मकस्य विष्णोः माहात्म्यं यथा जानीथ हे स्तोतारस्तथा सङ्कीर्तयत। हे विष्णो सर्वात्मको देव, महतस्ते शोभात्मिकां वृद्धिं वयं यजमाना भजामहे इति समयस्य मन्त्रस्याशयो यथाह ऋषिर्दीर्घतमाः–

**'तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन।**
**आस्यं जानन्तो नाम चिद्विविक्तन महस्ते विष्णो सुमतिं भजामहे।।**[२२]

वेदमन्त्रे विष्णोर्यज्ञात्मकत्वात् श्रीमद्भागवते यज्ञ एव विष्णोः शरीरमुक्तम्। अतएव शिशुं विष्णुं जिघांसुः कंसः स्वानुचरैर्यज्ञनाशाय प्रचोदितः–

**'मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः।**
**तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः।।**

**तस्मात् सर्वात्मना राजन् ब्राह्मणान्ब्रह्मवादिन।ः**
**तपस्विनो यज्ञशीलान् गाश्च हन्मो हविर्दुघाः' ।।**[२३]

ऋग्वेदे देवानां वाङ्मयं रूपं वर्णितम्। देवाधिपतिरिन्द्रो हिरण्यबाहुर्वज्रबाहुः सुशिप्रः। अग्निस्तु शुक्रवर्णः शोचिष्केशः शुचिदन्। अन्येषामपि देवानां रूपमृग्वेदे कल्पितम्। परं कीदृशोऽयं विष्णुर्न ज्ञायते। नायमत्र नवजलधरकान्तिर्न वा तप्तकाञ्चनवर्णः। केवलमस्ति तस्य त्रिपादगामिता। किन्तु कुतोऽयं शङ्खचक्रगदापद्मधारी। शतोत्तरपञ्चपञ्चाशत्सूक्तस्य षष्ठमन्त्रे एवमुक्तम्–युवाकुमारो विष्णुः कालातिगोऽपि कालनियन्ता। ग्रीष्मवर्षाशरद्वसन्तानामृतूनां चक्राकारेणा–वर्तयति समराङ्गणमुपैति–

**'चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीरवीविपत्।**
**बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम्।।**[२४]

---

२२. ऋग्वेदे १/१५६/३

२३. श्रीमद्भागतपुराणे १०/४/४०

२४. तत्रैव १/१५५/६

अत्रैव कालचक्रधरस्य विष्णोर्बृहच्छरीत्वाद् विराडात्मनावस्थानं सायणाचार्येणोपदिशते। विष्णोरिदं कालचक्रं कालान्तरे महाकाव्ये सुदर्शनचक्रे रूपायितम्। अग्निपुराणे चक्रधरस्य विष्णोः रूपमेवं कल्पितम्–

**'दक्षिणे तु करे चक्रमधस्तात् पद्ममेव च।**
**वामे शङ्खं गदाधरस्ताद्वासुदेवस्य लक्षणात्।।**[२५]

सखिमान् विष्णुः स्वर्गादिफलप्रदाता। स एव परमो बन्धुः तत्पदमेव मधुन उत्सः–

**'उरुक्रमस्य स हि बन्धुरित्था विष्णो पदे परमे मध्व उत्सः।।**[२६]

अतएव मधुरममृतमयं तत्पदं सदा ध्यायन्ते सूरयः–

**'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।**
**दिवीव चक्षुराततम्'।।**[२७]

विष्णुरयं नवीयान्वेदे सुमज्जानिः, जाया तस्य सुतरां मादयति। महात्मने तस्मै हव्यप्रदानाय दीर्घतमस ऋषेरुपदेशः–

**'य पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति।**
**यो जातमस्य महतो महि ब्रवत् सेदु श्रवोभिर्युज्यं चिदभ्यसत'।।**[२८]

सख्यरूपेण विष्णोरुपासनाया बीजमृग्वेदे एव निहितमस्ति। ऋषिर्दीर्घतमा सुखप्रदस्य विष्णोर्मैत्रीं प्रार्थयते

**'भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्नः एवया उ सप्रथाः।**
**अधा ते विष्णो विदुषा चिदछर्यः स्तोमो यज्ञश्च राध्यो हविष्मता'।।**[२९]

२५. अग्निपुराणे ४४/४६
२६. ऋग्वेदे १/१५४/५
२७. तत्रैव १/२२/२०
२८. तत्रैव १/१५६/२
२९. तत्रैव १/१५६/१

ऋग्वेदस्य प्रथममण्डले शतोत्तरचतुः पञ्चाशत् शतोत्तरषट्पञ्चाशत्सं–ख्यकमिति सूक्तद्वयं यच्च ऋषिणा दीर्घतमसा दृष्टं तदेव केवलं पूर्णात्मना विष्णवे निवेद्यते। शतोत्तरपञ्चपञ्चाशत्सूक्ते विष्णुरिन्द्रेण स्तूयते। अत्रैव द्वाविंशतिसूक्ते अश्विप्रभृतिदेवैरयं स्तुतः काण्वमेधातिथिना। सूर्येण मित्रेणास्याऽभिन्नता अङ्गीक्रियते चेदस्य महिमविस्तारो भवतीति न संशयस्तथापि इन्द्राग्नीनयम् सार्वभौमः सर्वदेवातिशायी विष्णुर्नातिशेते इति चित्रम्। न केवलं मनुष्याणां देवानामपि पतनोत्थानमस्ति। वैदिकयुगे इन्द्राग्नी सर्वोत्तमौ स्तः महाकाव्ये पुराणे किं चास्माकमाधुनिकयुगे विष्णुरेव शरणं महाप्रभावात्, दास्यसख्यमधुरभावैरस्योपासना भक्तजनानां मुक्तये भवति। दुरासदोऽयं सुदुर्दशो दुर्धर्षो देवो भक्तपराधीनो भक्तानां समुद्धर्ता–

**'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्'।**[३०]

वैदिकयुगस्य प्रभुसम्मितो भगवान् विष्णुरिदानीं सुहृत्सम्मितः कान्तासम्मितो वा परमकरुणया भक्ताधीनः स्वतन्त्रोऽप्यस्वतन्त्रो जातः–

**'अहं भक्तपाराधीनो ह्यस्वतन्त्र इव द्विज।**
**साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः'।।**[३१]

***

३०. श्रीमदभगवद्गीतायाम् १२/७

३१. श्रीमद्भागवतपुराणे ६/४/६३

# घोषणा–पत्र

'अजस्रा' नामक समाचारपत्र के सम्बन्ध में समाचारपत्र– रजिस्ट्रीकरण (केन्द्रीय) नियमावली, १९५६ के नियम ८ (१) के अधीन प्रकाशितव्य स्वामित्व–सम्बन्धी तथा अन्य ब्योरे।

**प्रारूप चार**

**१–प्रकाशन का स्थान–** अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' अलीगञ्ज, लखनऊ–२२६ ०२४

**२–प्रकाशन की कालिकता–** त्रैमासिक (मकर, मेष तथा कर्क, तुला की सङ्क्रान्तियों को)

**३–मुद्रक का–** (१) नाम–श्री मनीष मेहता
(२) राष्ट्रिकता–भारतीय
(३) पता–प्नार आफसेट, १७, अशोक मार्ग, हजरतगंज लखनऊ–२२६ ०१८

**४–प्रकाशक का** (१) नाम–प्रो० बृजेशकुमारशुक्ल
(२) राष्ट्रिकता–भारतीय
(३) पता–अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' लखनऊ–२२६ ०२४

**५–सम्पादक का** (१) नाम–डॉ. अशोककुमार कालिया
(२) राष्ट्रिकता–भारतीय
(३) पता–बी–१ /१६, कल्याण विहार, सेक्टर 'के' अलीगञ्ज, लखनऊ– २२६ ०२४

**६–स्वामी का नाम और पता–** अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' लखनऊ–२२६ ०२४

मैं, प्रो० बृजेशकुमारशुक्ल, एतदद्वारा घोषित करता हूँ कि ऊपर दिये हुये ब्योरे मेरे पूर्णतम ज्ञान और विश्वास के अनुसार सत्य हैं।

(ह.) प्रो० बृजेशकुमारशुक्ल 'पद्मश्री'
प्रकाशक (अखिल भारतीय संस्कृत–परिषद्, लखनऊ की ओर से)

ISSN : 2278-3741

पञ्ची. सङ्ख्या आर. एन. २६२३२/७७

अङ्काः १ – ४

वर्षद्वयम् ४३–४४